Barcode : 99999990173087
Title -
Author -
Language - sanskrit
Pages - 115
Publication Year - 1948
Barcode EAN.UCC-13

विद्यादेवीमुपास्महे ।

गद्य—पद्य—माला

चतुर्थं कुसुमम्



मूल्यं रूप्यकद्वयम्

विद्यादेवीमुपास्महे ।

गद्य-पद्य-माला

चतुर्थं कुसुमम्

(टिळक-महाराष्ट्र-विद्यापीठस्य 'संस्कृत-परिचय' (चतुर्थ)—
परीक्षार्थं नियुक्तं पाठ्यपुस्तकम्)

CHECKED 1973
Initial

सम्पादकौ
पं. सुब्रह्मण्यशास्त्री पाटणकर 'मीमांसाविद्वान्'
पं. शि. ह. धुपकर 'काव्यतीर्थ'

आषाढ शु.११-१८७०] मूल्यं रूप्यकद्वयम् [१६-७-१९४८

प्रकाशक :
वा. वा. [illegible],
कार्यवाह, टिळक महाराष्ट्र विद्यापीठ.
५२१, सदाशिव पेठ, पुणें २.

सर्वेऽधिकाराः प्रकाशकायत्ताः ।

मुद्रक :
लक्ष्मण नारायण चापेकर
आर्यसंस्कृति मुद्रणालय,
११८/१७, सदाशिव, पुणें २.

श्रीकेवलानन्दसरस्वतीनामभिप्रायः

ॐनारायणस्मरणम् ।

तिलक-महाराष्ट्र-विद्यापीठानम्यमानेन पण्डितद्वयेन सम्पादितं 'गद्य-पद्य माला' नाम चतुर्थपरीक्षोपयुक्तं पाठ्यपुस्तकमस्माभिर्लब्धं दृष्टं विचारित च मनीषया । अत्रत्या उद्धाराः सर्वे नितान्तमहत्तमवाङ्मयस्थाः । ब्राह्मणोपनिषन्महाभारतरामायणस्थाः केचित् । व्याकरणमीमांसाभाष्यस्थौ च, आर्यचाणक्यप्रणीतार्थशास्त्रस्थश्च, माघबाणभारविश्रीहर्षकालिदासभवभूतिवाङ्मयस्थाश्च, चम्पूद्वयस्थौ च, साहित्यदर्पणस्थश्च, लौकिकव्यवहारोपयोगिनौ च सुभाषितानि च कानिचित् इति उद्धारा अत्रत्याः । एतत् कुसुममामोदि उपजिघ्रतां पाठकानां मन्यामहे नितान्तं प्रमोदमुपजनयिष्यति इत्यलं स्वत एवोत्तमस्य पुनरुत्तमत्वप्रतिपादनेनेति विरम्यते ।

आषाढे कृष्णे नवमी
भृगुवासरः । शाकः १८७०

स्वामी केवलानन्दसरस्वती,
वाई.

मुम्बापुरीप्रान्तस्य प्रधानमन्त्रिणां श्रीमतां खेरमहोदयानां पुरस्कारः

'अद्य निरतिशयः आनन्दः मे मनसि पुस्तिकामिमां पुरस्कुर्वतः। संस्कृतिशीलयोरन्वयेन श्रेष्ठवाङ्मयाध्ययनस्य महत्त्वं सुविदितमेव। संस्कृत-सारस्वतस्य च लोकोत्तरत्वं महाभिमानास्पदं जातं भारतवासिनाम्। एवं सत्यपि व्यवहारेऽप्रचलितत्वात् संस्कृतभाषायाः सर्वमपि तद् दुरवबोधं मन्यते सामान्यजनैः। अज्ञानमिदं दूरीकर्तुं गीर्वाणवाङ्मये च प्रीतिं जनयितुं तिलक-महाराष्ट्र-विद्यापीठेन संस्कृतमण्डलद्वारा संस्कृताध्यापन-परीक्षादिः प्रयत्नः क्रियते। परिचयपरीक्षापाठा अस्मिन् पुस्तके श्री-सम्पादकमहाशयैर्ग्रथितास्तेषां वाङ्मयावगाहनं लेखविवेकचातुर्यं च प्रकाशयन्ति। अन्तर्भूताः पाठाः विषयवैविध्येन भाषासुबोधतया च संस्कृतवाङ्मयाभ्यासेच्छूनां जिज्ञासाजागृत्यर्थं गीर्वाणवाण्यां प्रीतिं च निर्मातुं सुसमर्थाः। अङ्गीकृतकार्ये अत्रभवद्भिः समासादितं यशः अधिकाधिकरमणीयग्रन्थग्रथनाकांक्षां जनयति।

पुस्तकमिदं विद्यार्थिनामन्येषां च गीर्वाणवाणीरसिकानां प्रियं भवेदिति शुभेच्छां प्रकटीकरोमि'।

२६ जुलै १९४८.

बा. गं. खेरः
मुंबापुरी.

प्रस्तावना



स्वदेशीयानां विदेशीयानां च तासां तासां भाषाणां प्रचाराय यथा विविधाभिः संस्थाभिः परीक्षाः प्रचाल्य प्रयत्नः कृतः, तद्वदेव संस्कृत-भाषायाः प्रचाराय सर्वजनसाधारणतया रुच्युत्पादनाय च अस्माभिः अयं नवीनः परीक्षोपक्रमः कृतः। इदंप्रथमतया प्रवृत्तास्वप्येतासु परीक्षासु वर्षद्वयात्मकेनाल्पेनैव कालेन प्रायशो दशसहस्रसंख्याकानां विद्यार्थिनां प्रवेशो जातः। तेन चैषा परीक्षापद्धतिः विद्यार्थिजनप्रिया भवेदिति निःसन्देहमवधारयितुं शक्यते। अखिलेऽपि भारतवर्षे संस्कृतविषये परीक्षा-व्यवस्थापिकानामितरासां संस्थानां विद्यमानत्वेऽपि विषयसौलभ्येनापेक्षित-क्रमबद्धत्वेन च एतास्वेव परीक्षासु विद्यार्थिनां नितरामादरो दृश्यत इति प्रमोदावहम्।

प्रतिपरीक्षं पाठ्यपुस्तकव्यवस्था अपेक्ष्यत एवेति परिचयपरीक्षायाः कृते पुस्तकमेतत्प्रकाशितम्। अस्मिंश्च पुस्तके केचन पाठाः वैदिकवाङ्मयतः, केचन दर्शनतः, अपरे च काव्यनाटकादिभ्य उद्धृता इति विषय-विविधत्वानुसारेण प्रायशः सर्वस्यैव संस्कृतवाङ्मयस्य परिचयः कारितः। तत्तत्पाठोपक्रमे च प्रसिद्धानां तत्तद्ग्रन्थकाराणां जन्मदेशकालादिविषये संक्षेपतो निर्देशः कृतः। तथैव तत्तत्पाठे प्रतिपाद्यमानस्य विषयस्य वैशिष्ट्यं, यथासम्भवं पूर्वापरसन्दर्भश्चेत्येवमादिकमतीव सुलभभाषया प्रतिपादितम्। अपि च पाठान्ते विद्यार्थिबुद्धिवैशद्यकारिणः प्रश्ना अपि परीक्षाधोरणीमाधु-निकीं पद्धतिं चानुसृत्य विन्यस्ताः। पाठेषु च क्वचित् क्वचित् मूलग्रन्थे विद्यमानाया रचनायाः सौलभ्यदृष्ट्या, आकर्षकत्वदृष्ट्या, सामंजस्य-दृष्ट्या चापेक्षितोऽन्यथाभावः स्वातंत्र्येण मूलार्थसौन्दर्याविरोधेन कृतः। पुस्तकान्ते च परिशिष्टभागे अध्ययनाध्यापनोपयोगिटिप्पण्यः आवश्यकं

छन्दोविज्ञानम् उपयुक्तानि व्याकरणसूत्राणि च समुल्लिखितानि, अत एवैषा सुतरामभिनवा पुस्तकरचना सर्वेषामपि संस्कृतविद्यादरवतां जनानां महदुपयोगकारिणी भवेत् इति विश्वसिमः। अनयैव रीत्या प्राथमिकपरीक्षात्रयोपयोगिनामपि पाठ्यपुस्तकानां प्रकाशनं नचिरादेव चिकीर्षितमस्ति। तदिदं विद्यादेवतासमाराधनरूपं कार्यं श्रीसरस्वतीकृपाकटाक्षवशेन संस्कृतविद्याभिमानिजनतासाहाय्येन च परिपूर्णतां यायादिति बाढमाशास्महे।

संस्कृत-विद्या-मण्डलम्,

टिळक-महाराष्ट्र-विद्यापीठम्.

अनुक्रमः

(१) कपिराजस्य युक्तिवादः	१
(२) काव्यस्य प्रयोजनं स्वरूपं च	४
(३) क्षात्रतेजस्विनी द्रौपदी	७
(४) कपिराजं प्रति रामस्योत्तरम्	१२
(५) अभियानकालः	१५
(६) निगूढो मन्त्रविचारः	२०
(७) चित्रदर्शनम्	२४
(८) महाश्वेतादर्शनम्	३१
(९) किरातार्जुनौ	३५
(१०) महाभाष्यपरिच्छेदौ	४०
(११) शकुन्तला पतिगृहं प्रतिष्ठते	४५
(१२) मानवकर्तव्यानि	५२
(१३) युद्धोद्यतः शिशुपालः	५४
(१४) प्रदीप्तकोपं भीमं धर्मराजः सान्त्वयति	५८
(१५) यज्ञाधिकारविचारः	६१
(१६) रघुराजस्य पराक्रमो राजनीतिश्च	६४
(१७) रामस्य वनगमनम्	६८
(१८) हंसदूतः	७२
(१९) शुनःशेपकथा	७८
(२०) पत्रलेखनम्	८२
(२१) निबन्धलेखनम्	८५
(२२) सुभाषितानि	८८
परिशिष्टम् (१) टिप्पण्यः	९७
परिशिष्टम् (२) छन्दोव्याकरणे	१०३

कपिराजस्य युक्तिवादः

परिचयः—आदिकविरिति पदवीविभूषितो वाल्मीकिनामा भारतवर्षस्य आद्यः कविः। असौ च वल्मीकसम्भवात् वाल्मीकिरिति प्रातः। यस्य 'मा निषाद' इति श्लोकः, 'क्रौञ्चद्वन्द्वियोगोत्थः शोकः श्लोकत्वमागतः' प्रसिद्ध एव। अनेन विरचितं रामायणं रामरावणकथाप्रतिपादकं न केवलमितिहासरूपम्; किन्तु सहृदयानुरञ्जकं रसास्वादकरं चादिकाव्यम्।

काण्डषट्कात्मकेऽस्मिन्नादिकाव्ये किष्किन्धाकाण्डतः समुद्धृतोऽयं रामवालिनोः संवादो हृदयाह्लादकः। सुग्रीवपक्षपातिना रामेण वालि-सुग्रीवयोर्द्वन्द्वं घटयित्वा छलेन निहतो वाली स्वकीयवधकारणं पृच्छन् युक्तिवादेन रामं निरुत्तरीकरोति। तद्यथा—'विषये वा पुरे वा ते नैव पाप करोम्यहम्। न च त्वामवजानेऽहं कस्मात्त्वं हंस्यकिल्बिषम्'॥ 'उदासीनेषु चास्मासु विक्रमोऽयं प्रकाशितः'। एवं रीत्या वालिकृता आक्षेपाः सुतरां न्यायसम्मता रुचिराश्च दृश्यन्ते। तदास्वादं सुकुमारमतयच्छात्राः स्वयमेवानुभवेयुः।

ततः शरेणाभिहतो रामेण रणकर्कशः।
पपात सहसा वाली निकृत्त इव पादपः॥ १॥
भूमौ निपतितस्यापि तस्य देहं महात्मनः।
न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः॥ २॥
शक्रदत्ता वरा माला काञ्चनी रत्नभूषिता।
दधार हरिमुख्यस्य प्राणांस्तेज श्रियं च सा॥ ३॥
लक्ष्मणानुचरो रामो ददर्शोपससर्प च।
तं तथा पतितं संख्ये गतार्चिषमिवानलम्॥ ४॥

मानयित्वा च तं वीरं वीक्षमाणं शनैरिव ।
उपयातौ महावीरौ भ्रातरौ रामलक्ष्मणौ ॥ ५ ॥
तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् ।
अब्रवीत्परुषं वाक्यं प्रश्रितं धर्मसंहितम् ॥ ६ ॥
कुलीनः सत्वसम्पन्नः तेजस्वी चरितव्रतः ।
रामः करुणवेदी च प्रजानां च हिते रतः ॥ ७ ॥
सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः ।
इत्येतत्सर्वभूतानि कथयन्ति यशो भुवि ॥ ८ ॥
त्वामहं निहतात्मानं धर्मध्वजमधार्मिकम् ।
जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ ९ ॥
विषये वा पुरे वा ते नैव पापं करोम्यहम् ।
न च त्वामवजानेऽहं कस्मात्त्वं हंस्यकिल्बिषम् ? ॥ १० ॥
कः क्षत्रियकुले जातः श्रुतवान् नष्टसंशयः ।
धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ? ॥ ११ ॥
त्वं राघवकुले जातो धर्मवानिति विश्रुतः ।
अभव्यो भव्यरूपेण किमर्थं परिधावसि ? ॥ १२ ॥
साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ।
पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु ॥ १३ ॥
वयं वनचरा राम मृगा मूलफलाशिनः ।
एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वर ॥ १४ ॥
हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम् ।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् ॥ १५ ॥
राजहा ब्रह्महा गोघ्नः चोरः प्राणिवधे रतः ।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ १६ ॥
अधार्यं चर्म मे सद्भिः रोमाण्यस्थि च वर्जितम् ।
अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ १७ ॥

तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम् ।
तदतिक्रम्य मोहेन कालस्य वशमागतः ॥ १८ ॥
उदासीनेषु चास्मासु विक्रमोऽयं प्रकाशितः ।
अपकारिषु ते राम नैवं पश्यामि विक्रमम् ॥ १९ ॥
दृश्यमानस्तु युध्येथा मया युधि नृपात्मज ।
अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ २० ॥
मामेव यदि पूर्वं त्वम् एतदर्थमवक्ष्यथाः ।
सीतामेकदिनेनाहम् आनेष्यं तव सन्निधिम् ॥ २१ ॥
राक्षसं च दुरात्मानं तव भार्यापहारिणम् ।
कण्ठे बद्ध्वा प्रदद्यां तेऽनिहतं रावणं रणे ॥ २२ ॥
न्यस्तां सागरतोये वा पाताले वापि मैथिलीम् ।
आनयेयं तवादेशात् श्वेताश्वतरीमिव ॥ २३ ॥
युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ।
अयुक्तं यदधर्मेण त्वयाहं निहतो रणे ॥ २४ ॥
काममेवंविधो लोकः कालेन विनियुज्यते ।
शक्यं चेद् भवता प्राप्तम् उत्तरं साधु चिन्त्यताम् ॥ २५ ॥

प्रश्नाः—

(१) कीदृशं रामस्य यशः ?

(२) वाली स्ववधस्य अनौचित्यं कथं समर्थयति ?

(३) 'पुरुषस्त्वं नरेश्वर' 'अपकारिषु ते राम नैवं पश्यामि विक्रमम्' अनयोर्वाक्ययोः को गर्भितो भावः ?

(४) अनिहतो रावणो वालिना पूर्वं निगृहीतः स्वसुतस्याङ्गदस्य दोलायां निषद्यश्चेति कथा स्ववाक्यैस्तरेण लिख्यताम् ।

---

(२)

काव्यस्य प्रयोजनं स्वरूपं च

परिचयः—साहित्यदर्पणकर्ता विश्वनाथकविः विश्रुतो वर्तते । तद्ग्रन्थस्य प्रथमपरिच्छेदे काव्यस्य स्वरूपं प्रयोजनं च वर्णितम् । तेन किं नाम काव्यम् ? किं तस्य प्रयोजनम् इत्यंशद्वयं ज्ञातुं सुशकम् । स्वरूपप्रयोजनेऽजानन् काव्याध्ययने कथं प्रवर्तेत ? अतः तयोर्ज्ञानस्यातीवावश्यकता वर्तते । तत्र प्रयोजनं 'करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् , रामादिवत्प्रवर्तितव्यम् , न रावणादिवत् ' इत्यादि सुलभभाषया प्रतिपादितम् । स्वरूपं तु पूर्वोत्तरपक्षनिरूपणद्वारा दार्शनिकीं भाषामाश्रित्य कथितम् । क्रिस्ताब्दस्य चतुर्दशे शतकेऽयं कविर्बभूवेति काव्यप्रकाशकारात् मम्मटभट्टादर्वाचीन इति च वदन्तीतिहासविदः

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु ॥ १ ॥

काव्यप्रयोजनानि—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ २ ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो 'रामादिवत्प्रवर्तितव्यम् , न रावणादिवत्' इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव । उक्तं च—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥ ३ ॥

किंच — काव्यात् धर्मप्राप्तिः भगवन्नारायणचरणारविन्द-स्तवादिना, 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके काम-धुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुतरामेव । अर्थप्राप्तिश्च प्रत्यक्षसिद्धा । कामप्राप्तिश्च अर्थद्वारा एव । मोक्षप्राप्तिश्च एतज्जन्य-धर्मफलानुसन्धानात्, मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च । चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धी-नामेव जायते । परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धी-नामपि काव्यादेव ।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु, किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात् ? किंच काव्यस्योपादेयत्वम् अग्निपुराणेऽ-प्युक्तम् —

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥ ४ ॥

'त्रिवर्गसाधनं नाट्यम्' इति च । विष्णुपुराणेऽपि—काव्या-लापाश्च ये केचित् गीतकान्यखिलानि च । शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥ ५ ॥ इति ।

काव्यस्वरूपम् —

तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते । तत् किं स्वरूप-मित्यपेक्षायां कश्चिदाह, 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' (काव्यप्रकाश १.४) इति । एतच्चिन्त्यम् । तथाहि— यदि दोषरहितस्यैव काव्यत्वाङ्गीकारः, तदा काव्यं प्रविरलविषयं निर्विषयं वा स्यात् ; सर्वथा निर्दोषस्यैकान्तमसम्भवात् ।

किं च, शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम्; गुणानां रसैकधर्मत्वस्य 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' (काव्यप्रकाश ८.६६) इत्यादिना तेनैव प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेन उपचारत उपपद्यत इति चेत्, तथाप्ययुक्तम्। तथाहि-तयोः काव्यस्वरूपत्वेनाभिमतयोः शब्दार्थयोः रसोऽस्ति न वा ?। नास्ति चेत्, गुणवत्त्वमपि नास्ति; गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्, कथं नोक्तं रसवन्ताविति विशेषणम् ? गुणवत्त्वान्यथानुपपत्त्या एतल्लभ्यत इति चेत्, तर्हि सरसावित्येव वक्तुं युक्तं न सगुणाविति। न हि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते ! ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यौ इत्यभिप्राय इति चेत्, न; गुणाभिव्यञ्जकशब्दार्थवत्त्वस्यापि काव्ये उत्कर्षमात्राधायकत्वम्, न तु स्वरूपाधायकत्वम्। उक्तं हि—काव्यस्य शब्दार्थौ शरीरम्; रसादिश्चात्मा; गुणाः शौर्यादिवत्; दोषाः काणत्वादिवत्; रीतयः अवयवसंस्थानविशेषवत्; अलङ्काराः कटककुण्डलादिवत् इति। एतेन 'अनलङ्कृती पुनः क्वापि' इति यदुक्तं, तदपि परास्तम्। अस्य ह्यर्थः, सर्वत्र सालंकारौ क्वचित्त्वस्फुटालंकारावपि शब्दार्थौ काव्यमिति। तत्र सालंकारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात्। आग्नेयपुराणेऽप्युक्तम्—

'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति। व्यक्तिविवेककारेणाप्युक्तम्—'काव्यस्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद्विमतिः' इति। ध्वनिकारेणाप्युक्तम् 'न हि कवेरितिवृत्तमात्रनिर्वाहेण आत्मलाभः; इतिहासादेरेव तत्सिद्धेः' इत्यादि।

ननु तर्हि प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत् न; रसवत्पद्यान्तर्गतनीरसपद्यानामिव पद्यरसेन

बन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। यत्तु नीरसेऽपि गुणा-
भव्यञ्जकवर्णसद्भावात् दोषाभावात् अलङ्कारसद्भावाच्च
ाव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्यात् गौण एव। तत् किं-
वरूपं काव्यम्? इत्युच्यते। 'वाक्यं रसात्मकं काव्यम्'।

आः—

(१) काव्यस्य कानि फलानि ?

(२) वेदशास्त्रापेक्षया काव्ये को विशेषः ?

(३) तीक्ष्णबुद्धीनां जनानां काव्यमुपादेयं भवति न वा ?

(४) काव्यप्रकाशकारकृतं काव्यलक्षणं युक्तिभिः खण्डनीयम्।

(५) स्पष्टीकुरुत।

(१) अन्वयव्यतिरेकौ. (२) अन्यथानुपपत्तिः (३) चतुर्वर्गः।

(६) काव्यवाङ्मयस्य नरदेहतुलना कथं संगच्छते ? ग्रन्थानुसारेण लिखत।

---

(२)

क्षात्रतेजस्विनी द्रौपदी

परिचयः—गभीरार्थप्रतिपादकानां महाकाव्यानां निर्मातृषु भारविर्नाम तवर्षे सुप्रसिद्धः कविः। काव्येषु कानिचित् द्राक्षापाकतुल्यानि, ापि च नारिकेलपाकतुल्यानि। तदुक्तम्—

'द्राक्षापाकः स कथितो बहिरन्तस्फुरद्रसः।
स नारिकेलपाकः स्यात् अन्तर्गूढरसोदयः' ॥ इति ॥

अर्थतः शब्दतश्च सुगमानां येषां काव्यानां वाचनमात्रेणैव रसास्वादो भवति ते द्राक्षापाकाः । शब्दतोऽर्थतश्च दुर्गमाणां येषां रसास्वादः केवल वाचनेन न भवति, किन्तु शब्दार्थविज्ञाने विशेषप्रयासमपेक्षते ते नारिकेल पाकाः । भारविकविकृतं किरातार्जुनीयकाव्यं तु द्वितीयकोट्यामन्तर्भवति । अयं च भारविः क्रिस्ताब्दस्य षष्ठे शतके सम्भूतेति वदन्तीतिहास-काराः । एतस्य जन्मदेशस्तु नाद्यापि निर्धारितः । एतेन रचितस्य महा-काव्यस्य किरातार्जुनीयमिति नाम कथावृत्तदर्शकं वर्तते । अर्जुन इन्द्रकील पर्वते उग्रेण तपसा महेश्वरं प्रसाद्य किरातरूपधारिणस्तस्मात् पाशुपतं नाम दिव्यास्त्रं लेभे इति महाभारतीया कथास्य काव्यस्य मूलम् ।

तत्र च प्रथमसर्गात् उद्धृतोऽयं पद्यसमुदायः । अत्र च द्वैतवनस्थितेन युधिष्ठिरेण प्रणिधिरूपेण प्रहितो वनेचरो दुर्योधनवृत्तं निभृतं विज्ञाय प्रत्यागतो युधिष्ठिराय तद्वार्तां कथयति । तत्र 'स किमस्ति साधु न शास्ति योऽधिपम्, हितं मनोहारि च दुर्लभं वचः, अहो दुरन्ता बलवद्विरोधिता,' इत्यादिना सम्यक्ग्रथितानि व्यावहारिकाणि तत्त्वानि वाचकानां हृदय-मावर्जयन्ति । दुर्योधस्योत्कर्षं दूतमुखात् विज्ञाय प्रक्षुब्धमानसा द्रौपदी युधिष्ठिरादीन् युद्धोद्यमे प्रवर्तयितुं यद् भाषते; तद्भाषणमभिजातक्षत्र-कुलोत्पन्नानां पुरातनीनां भारतीयनारीणां राजनीत्यभिज्ञत्वं परपरिभवासहत्वं च सूचयति ।

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ।१।
कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो, न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।२।
द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ।३।

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥३॥
स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥४॥
निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥५॥
विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥६॥
तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमात् वरं विरोधोऽपि समं महात्मभिः ॥७॥
सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥८॥
महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥९॥
महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥१०॥
न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्मौल्यमिवास्य शासनम् ॥११॥
स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥१२॥
प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥१३॥
तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥१४॥
इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥१५॥

निशम्य सिद्धिं द्विषतामपाकृतीः ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीः उदाजहार द्रुपदात्मजा गिरः ॥१७॥
भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥१८॥
अखण्डमाखण्डलतुल्यधामभिः चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥१९॥
भजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान्निशिता इवेषवः २०
भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छ्वसः ॥२१
अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥२२॥
परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥२३
विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः ॥२४
वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥२५
इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं समाधयः ॥२६
पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥२७
अनारतं यौ मणिपीठशायिनौ अरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥२८॥
द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥२९॥

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥३०॥
अथ क्षमामेव निरस्तविक्रमः चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥३१॥

प्रश्नाः

(१) शत्रोः दुर्योधनस्योत्कर्षवृत्तं कथयतः वनेचरस्य मनः उद्विग्नमभूत् न वा ?

(२) दुर्योधनः अग्निसाध्यानि यज्ञकर्माणि कुतः करोति स्म ?

(३) दुर्योधनस्य राज्यशासनपद्धतिं स्ववाक्यैः कथयत ।

(४) 'प्रतीयते धातुरिवेहितं फलैः' इति वाक्यं दुर्योधनविषये घटयत । 'फलानुमेयाः प्रारम्भाः' इति कालिदासवचनेनास्य वचनस्य सादृश्यं विमृशत ।

(५) द्रौपदीभाषणे दर्शितायाः भीमार्जुनादीनां पूर्वावस्थायाः तत्कालीनावस्थायाश्च कीदृशो भेदः ?

(६) पत्न्या द्रौपद्या कृतः पत्युर्धर्मराजस्याधिक्षेपः कथं संगच्छते ?

(७) 'पराभवोऽप्युत्सव एव मानिनाम्, शमेन सिद्धिं मुनयो व्रजन्ति, जटाधरः सञ्जुहुधीह पावकम्' एतैर्वाक्यैर्द्रौपद्या मनःस्थितिः कीदृशी उन्नीयते ? ॥

(४)

कपिराजं प्रति रामस्योत्तरम्

परिचयः —रामायणस्य कर्तुरादिकवेर्वाल्मीकेः परिचयः प्रथमपाठे निर्दिष्ट इहाप्यनुसन्धेयः। तत एव रामायणादुद्धृतोऽयं भागः। अस्य च नैशिष्ट्यम्— वालिना अधिक्षिप्तो रामः तद्बधात्मकं स्वकृत्यं धर्म्यमेवेति समर्थयति। " अधुना भरतो राजा, स च धर्मेण राज्यं शास्ति, तदादेशवर्तिनो वयमपि धर्मरक्षण एव बद्धपरिकराः, त्वं च सुग्रीवपत्नीहरणेन सापराधोऽसि। अपराधिनश्च युक्त एव दण्डः। किञ्च सुग्रीवसन्निधौ मया प्रतिज्ञा कृता 'तुभ्यं राज्यं दास्यामी'ति, साऽधुना उपेक्षितुमशक्या। अपि च – मृगया नाम क्षत्रियाणां धर्म एव। मृगयायां च अदृश्यां शाखामृगाणां वधो न प्रत्यवायकारी " इत्यादियुक्तिवादेन समाहितो वाली तदनुमत्य देहत्यागकाले पुत्रादिरक्षणभारं रामे निचिक्षेप। सोऽयं सन्दर्भः सांसारिकसुखदुःखाद्यनुभववतां हृदयानुरञ्जकः, अन्तकालीनदुःखानुभावकः शोकपूर्णो मर्मवेधी च वर्तते। तस्यास्वादः पाठकैः स्वयमेवानुभवितव्यः।

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम्।
परुषं वालिना रामो निहतेन विचेतसा।
अधिक्षिप्तस्तदा रामो पश्चाद्वालिनमब्रवीत् ॥ १ ॥
धर्ममर्थं च कामं च समयं चापि लौकिकम्।
अविज्ञाय कथं बाल्यान् मामिहाद्य विगर्हसे ॥ २ ॥
अपृष्ट्वा बुद्धिसम्पन्नान् वृद्धानाचार्यसंमतान्।
सौम्यं वानरचापल्यात् त्वं मां वक्तुमिहेच्छसि ॥ ३ ॥

इक्ष्वाकूणामियं भूमिः सशैलवनकानना !
तां पालयति धर्मात्मा भरतः सत्यवान् ऋजुः ।
धर्मार्थकामतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ४ ॥
तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः ।
चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः ॥ ५ ॥
तस्मिन् नृपतिशार्दूले भरते धर्मवत्सले ।
पालयत्यखिलां पृथ्वीं कश्चरेत् धर्मविप्रियम् ? ॥ ६ ॥
ज्येष्ठो भ्राता पिता वापि, यश्च विद्यां प्रयच्छति ।
त्रयस्ते पितरो ज्ञेया धर्म्ये च पथि वर्तिनः ॥ ७ ॥
यवीयानात्मजः पुत्रः शिष्यश्चापि गुणोदितः ।
पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चैवात्र कारणम् ॥ ८ ॥
तदेतत्कारणं पश्य यदर्थं त्वं मया हतः ।
भार्यां किं हरसि भ्रातुः त्यक्त्वा धर्मं सनातनम् ॥ ९ ॥
अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः ।
रुमाया वर्तसे कामात्, स्नुषायां पापकर्मकृत् ॥ १० ॥
न हि लोकविरुद्धस्य लोकवृत्तादपेयुषः ।
दण्डादन्यत्र पश्यामि निग्रहं हरियूथप ॥११॥
प्रचरेद्यो नरः कामात् तस्य दण्डो वधः स्मृतः ।
त्वं च धर्मादतिक्रान्तः कथं शक्यमुपेक्षितुम् ? ॥१२॥
प्रतिज्ञा च मया दत्ता, तदा वानरसन्निधौ ।
सा चाधुना कथं शक्या मद्विधेनानवेक्षितुम् ? ॥१३॥
तदेभिः कारणैः सर्वैः महद्भिर्धर्मसंश्रितैः ।
शासनं तव यद्युक्तं तद्भवाननुमन्यताम् ॥१४॥
सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः ।
वयस्यस्योपकर्तव्यं धर्ममेवानुपश्यता ॥१५॥
तदलं परितापेन धर्मतः परिकल्पितः ।

वधो वानरशार्दूल, न वयं स्ववशे स्थिताः ॥१६॥
शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव ।
तच्छ्रुत्वा हि महावीर न मन्युं कर्तुमर्हसि ॥ १७ ॥
यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः ।
तस्मात् त्वं निहतो युद्धे मया बाणेन वानर ।
अयुध्यन् प्रतियुध्यन् वा यस्मात् शाखामृगो ह्यसि ॥ १८ ॥
एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम् ।
न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः ॥ १९ ॥
प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः ।
यत्त्वमात्थ नरश्रेष्ठ तत्तथैव न संशयः ॥ २० ॥
प्रतिवक्तुं प्रकृष्टे हि नापकृष्टस्तु शक्नुयात् ।
यदप्युक्तं मया पूर्वं प्रमादाद्वाक्यमप्रियम् ।
तत्रापि खलु मां दोषे कर्तुं नार्हसि राघव ॥ २१ ॥
बाष्पसंरुद्धकण्ठस्तु वाली सार्तरवः शनैः ।
उवाच रामं सम्प्रेक्ष्य पङ्कलग्न इव द्विपः ॥ २२ ॥
शोचामि नाहमात्मानं न तारां नापि बान्धवान् ।
यथा पुत्रं गुणज्येष्ठम् अङ्गदं कनकाङ्गदम् ॥ २३ ॥
स ममादर्शनात् दीनो बाल्यात्प्रभृति लालितः ।
तटाक इव पीताम्बुः उदशोषं गमिष्यति ॥ २४ ॥
बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः ।
तारेयो राम भवता रक्षणीयो महाबलः ॥ २५ ॥
या ते नरपते वृत्तिः भरते लक्ष्मणे च या ।
सुग्रीवे चाङ्गदे राजन् तां चिन्तयितुमर्हसि ॥ २६ ॥
मद्दोषकृतदोषां तां यथा तारां तपस्विनीम् ।
सुग्रीवो नावमन्येत तथावेक्षितुमर्हसि ॥ २७ ॥
इत्युक्त्वा वानरो रामं विरराम हरीश्वरः ।

स तमाश्वासयद्रामो वालिनं व्यक्तदर्शनम् ।
साधुसंमतया वाचा धर्मतत्वार्थयुक्तया ॥ २८ ॥
यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर ।
तथा वर्तेत सुग्रीवे मयि चापि न संशयः ॥ २९ ॥

वाली—

शराभितप्तेन विचेतसा मया
प्रभाषितस्त्वं यदजानता विभो ।
इदं महेन्द्रोपमभीमविक्रम
क्षमस्व मे सम्प्रति हे दयाघन ॥ ३० ॥

प्रश्नाः —

(१) रामः कामिर्युक्तिभिः स्वपक्षं समर्थयति ?
(२) अन्तकाले वालिनः समाधानं जातं न वा ?
(३) देहावसानसमये वालिमुखनिर्गतानि वचनानि किं द्योतयन्ति ?
(४) अन्ते च रामो वालिने किं प्रतिश्रुश्राव ?

---

(५)

अभियानकालः

परिचयः—आर्यचाणक्यनामा कश्चिद्विद्वान् नन्दराज्यकाले राजनीतिज्ञ इति सुप्रसिद्ध आसीत् । एतस्यैव विष्णुगुप्तः कौटिल्य इति चाभिधानान्तरम् । नन्दसंसदि स्त्रीयमपमानमसहमान एष महाशयो नन्दान्वयं समूलमुत्साद्य

तस्मिन् राज्ये चन्द्रगुप्तं स्थापयांचकार । क्रिस्तपूर्वे चतुर्थशतके अय सञ्जात इतीतिहासतो विज्ञायते । एतदीयराजनीतिकौशल्यस्य यथार्थानुभवो मुद्राराक्षसनाटकाज्जायते । तत्र 'नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मामान्मम' इति साभिमानं भाषमाणोऽयं केवलं स्वबुद्धितत्वोपजीवक आसीदिति प्रतीयते । तत्रैव 'उपलशकलमेतद्भेदकं गोमयानाम्' इत्यादिना चन्द्रगुप्तप्रधानमन्त्रिणोऽप्यस्य वैषयिकराज्यसुखनिःस्पृहता स्वकीयवर्णाश्रमधर्मतत्परता च स्फुटमवभासते । तेन विरचितं कौटिलीयमर्थशास्त्रं नाम ग्रन्थरत्नमखिलेऽपि भारते सुप्रथितं प्रामाणिकैराहृतं च । चन्द्रगुप्तस्य राज्यस्थितिलाभार्थमेव तेनायं ग्रन्थो विरचितो भवेदित्यप्युन्नीयते । ततश्च पुरातनकालेऽपि लोकानुरञ्जकराज्यशासनपद्धतेर्विमर्शः तत्कालीनैः सूक्ष्म विचारचतुरैर्विद्वद्भिरै राजनीतिशास्त्रावलम्बनेनैव कृत इत्यनुमीयते । एतस्य परम्पराशिष्यः कामन्दको गुरुकृपालब्धां राजनीतिज्ञतां स्वीयबुद्धिसामर्थ्येन संवर्धयन् राजनीतिविषये नीतिसारनामकं ग्रन्थं रचयाम्बभूव । सेयं परम्पराप्राप्ता भारतीयानां राजनीत्यभिज्ञता क्रमशो विलुप्ता सद्यःकाले क्वापि देशे नोपलभ्यते इत्यहोऽदूरदर्शितायाः प्रभाव एषः । ईदृश्यां परिस्थितावागामिनि काले राजनीतिज्ञानशिथिलता माभूदित्यनया बुद्ध्या विद्यार्थिवर्गेण प्राचीनराजनीतिशास्त्राध्ययने सद्यःपरिस्थितिसमीक्षणेन चतुरस्रमतिना भाव्यमित्येव युक्तम् ।

अयं च परिच्छेदः कौटिलीयार्थशास्त्रे नवमाधिकरणे प्रथमाध्यायात् (आदितो द्वाविंशतितमात्) उद्धृतः । अस्मिंश्च परिच्छेदे अभिशत्रु जैत्रयात्राकालविचारः सूक्ष्मतया कृतः । तत्रापि प्राचीनराजनीतिग्रन्थान् परामृश्यापेक्षितं परिवर्तनं ग्रन्थकारेण स्वबुद्धिकौशल्येन कृतम् । प्राचीनमतं च तत्र तत्र निराकृतमिति स्थाने स्थाने 'इत्याचार्याः, नेति कौटिल्यः' इति निर्देशेन ज्ञायते । अत्र चोत्साहप्रभावमन्त्रशक्तीनाम् उत्तरोत्तरबलीयस्त्वं सयुक्तिकं समर्थितम् । एवं जैत्रयात्रोचितपरिस्थितिविचारे जेतुर्नृपस्य देशकालादीनामानुकूल्यं शत्रोश्च तत्प्रातिकूल्यमपेक्षितमिति विस्तरेण

कथितम् । तथा हस्तिबलोपेतस्य , खरोष्ट्राश्वादिबलोपेतस्य , चतुरङ्गबलोपेतस्य चाभियानदेशव्यवस्थापि प्रदर्शिता ।

विजिगीषुरात्मनः परस्य च बलाबलं शक्तिदेशकालयात्राकालबलसमुत्थानकालपश्चात्कोपक्षयव्ययलाभादिं ज्ञात्वा विशिष्टबलो यायात् , अन्यथाऽऽसीत ।

उत्साहप्रभावयोरुत्साहः श्रेयान् । स्वयं हि राजा शूरो बलवानरोगः कृतास्त्रो दण्डद्वितीयोऽपि शक्तः प्रभाववन्तं राजानं जेतुम् , अल्पोऽपि चास्य दण्डस्तेजसा क्रूरकरो भवति । निरुत्साहस्तु प्रभाववान् राजा विक्रमाभिपन्नो नश्यतीत्याचार्याः ।

नेति कौटिल्यः । प्रभाववानुत्साहवन्तं राजानं प्रभावेणातिसन्धत्ते तद्विशिष्टमन्यं राजानमावाह्य हृत्वा क्रीत्वा प्रवीरपुरुषान् । प्रभूतप्रभावहयहस्तिरथोपकरणसम्पन्नश्चास्य दण्डः सर्वत्राप्रतिहतश्चरति । उत्साहवतश्च प्रभाववन्तो जित्वा क्रीत्वा च स्त्रियो बालाः पङ्गवोऽन्धाश्च पृथिवीं जिग्युरिति ।

प्रभावमन्त्रयोः प्रभावः श्रेयान् । मन्त्रशक्तिसम्पन्नो हि वन्ध्यबुद्धिरप्रभावो भवति , मन्त्रकर्म चास्य निश्चितमप्रभावो गर्भधान्यमवृष्टिरिवोपहन्ति इत्याचार्याः ।

नेति कौटिल्यः । मन्त्रशक्तिः श्रेयसी । प्रज्ञाशास्त्रचक्षुर्हि राजा अल्पेनापि प्रयत्नेन मन्त्रमाधातुं शक्तः , परानुत्साहप्रभाववतश्च सामादिभिर्योगोपनिषद्भ्यां चातिसन्धातुम् । एवमुत्साहप्रभावमन्त्रशक्तीनामुत्तरोत्तराधिकोऽतिसन्धत्ते ।

देशः पृथिव्री । तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्र-

परिमाणं तिर्यक् चक्रवर्तिक्षेत्रम् । तत्रारण्यो ग्राम्यः पार्वत औदको भौमः समो विषम इति विशेषाः । तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत । यत्रात्मनः सैन्यव्यायामानां भूमिः अभूमिः परस्य , स उत्तमो देशः । विपरीतोऽधमः । साधारणो मध्यमः ।

कालः शीतोष्णवर्षात्मा । तस्य रात्रिरहः पक्षो मास ऋतुरयनं संवत्सरो युगमिति विशेषाः । तेषु यथास्वबलवृद्धिकरं कर्म प्रयुञ्जीत । यत्रात्मनः सैन्यव्यायामानामृतुः अनृतुः परस्य स उत्तमः कालः । विपरीतोऽधमः । साधारणो मध्यमः ।

शक्तिदेशकालानां तु शक्तिः श्रेयसी इत्याचार्याः । शक्तिमान् हि निम्नस्थलवतो देशस्य शीतोष्णवर्षवतश्च कालस्य शक्तः प्रतीकारे भवति । देशः श्रेयानित्येके । स्थलगतो हि श्वा नक्रं विकर्षति, निम्नगतो नक्रः श्वानमिति । कालः श्रेयानित्येके । दिवा काकः कौशिकं हन्ति , रात्रौ कौशिकः काकमिति ।

नेति कौटिल्यः । परस्परसाधका हि शक्तिदेशकालाः । तैरभ्युच्चितः तृतीयं चतुर्थं वा दण्डस्यांशं मूले पार्ष्ण्यां प्रत्यन्ताटवीषु च रक्षां विधाय कार्यसाधनसहं कोशदण्डं चादाय क्षीणपुराणभक्तमगृहीतनवभक्तमसंस्कृतदुर्गममित्रं वार्षिकं सस्यं हैमनं च मुष्टिमुपहन्तुं मार्गशीर्षीं यात्रां यायात् । हैमनं चास्य सस्यं वासन्तिकं च मुष्टिमुपहन्तुं चैत्रीं यात्रां यायात् । क्षीणतृणकाष्ठोदकमसंस्कृतदुर्गममित्रं वासन्तिकं चास्य सस्यं वार्षिकीं वा मुष्टिमुपहन्तुं ज्येष्ठामूलीयां यात्रां यायात् ।

अत्युष्णमल्पयवसेन्धनोदकं वा देशं हेमन्ते यायात् । तुषारदुर्दिनमगाधनिम्नप्रायं गहनतृणवृक्षं वा देशं ग्रीष्मे यायात् । स्वसैन्यव्यायामयोग्यं परस्यायोग्यं वर्षति यायात् । मार्गशीर्षं तैषं चान्तरेण दीर्घकालां यात्रां यायात् । चैत्रं वैशाखं चान्तरेण

मध्यमकालाम्, ज्येष्ठामूलीयमाषाढं चान्तरेण ऱ्हस्वकालाम् व्यसने चतुर्थीम्। व्यसनाभियानं विगृह्ययाने व्याख्यातम्।

प्रायशश्चाचार्याः परव्यसने यातव्यमित्युपदिशन्ति। शक्त्युदये यातव्यमनैकान्तिकत्वात् व्यसनानामिति कौटिल्यः। यदा वा प्रयातः कर्शयितुमुच्छेतुं वा शक्नुयादमित्रं, तदा यायात्।

अत्युष्णोपक्षीणे कालेऽहस्तिबलप्रायो यायात्। हस्तिनो ह्यन्तः स्वेदाः कुष्ठिनो भवन्ति। अनवगाहमानास्तोयमपिबन्तश्चान्तश्चान्तरवक्षाराश्चान्धीभवन्ति। तस्मात् प्रभूतोदके देश वर्षति च हस्तिबलप्रायो यायात्। विपर्यये खरोष्ट्राश्वबलप्रायः। देशमल्पवर्षपङ्कं वर्षति, मरुप्रायं चतुरङ्गबलो यायात्। समविषमनिम्नस्थलऱ्हस्वदीर्घवशेन वाध्वनो यात्रां विभजेत्।

सर्वा वा ऱ्हस्वकालाः स्युः
यातव्याः कार्यलाघवात्।
दीर्घाः कार्यगुरुत्वाद्वा
वर्षावासः परत्र च ॥ १ ॥ इति।

प्रश्नाः —(१) उत्साहप्रभावमन्त्रशक्तीनां मध्ये कस्याः प्राबल्यम्?
(२) देशकालयोर्युद्धोपयोगिनोरुत्तमाधममध्यमभावः सोदाहरणं दर्शनीयः।
(३) युद्धयात्रायां वसन्तग्रीष्मादिकालव्यवस्था कीदृशी?

---

(६)

निगूढो मन्त्रविचारः

परिचयः— प्रौढपद्यकाव्यनिर्माणे भारवेरिव माघकवेरपि कौशलं प्रथितमेव । एतेन कविना शिशुपालवधाख्यं महाकाव्यं विरचितम् । अयं कविः क्रिस्ताब्दस्य सप्तमशतकपूर्वार्धे बभूवेति ज्ञायत इतिहासात् । जन्मदेशादिविषये तु सत्यपि विवादे गुर्जरदेशीयोऽयमित्यन्तरङ्गबहिरङ्गप्रमाणैर्निधारयितुं शक्यते । एतस्मिन् शिशुपालवधनामके महाकाव्ये प्राधान्येन प्रतिपाद्यमानः कथाभागो नाम्नैव सुज्ञेयः । द्वितीय सर्गात् समुद्धृत्य संकलितोऽयं भागः । अत्रत्यः कथासन्दर्भः —— युधिष्ठिरकृतामन्त्रणानुसारेण राजसूययज्ञार्थगमनं शिशुपालमभि युद्धयात्रागमनं चेति कार्यद्वयं श्रीकृष्णस्य कर्तव्यं समापतितं भवति । तयोर्मध्ये कस्य प्रथमकर्तव्यतेति निर्धारणाय उद्धवबलरामाभ्यां सह राजनैतिको मन्त्रविचारः प्रवर्तते ।

तत्र श्रीकृष्णेन विषयोपन्यासे कृते प्रहारप्रियो धीरोद्धतस्वभावो बलरामो युद्धयात्राकर्तव्यतामेव युक्तिभिः साधयति । अस्मिन् सन्दर्भे 'उत्तिष्ठमानस्तु परो नोपेक्ष्यो भूतिमिच्छता , ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि , महीयांसः प्रकृत्या मितभाषिणः, क्रिया केवलमुत्तरम्, स्वस्थादेवापमानेऽपि देहिनस्तद्धरं रजः, चतुर्थोपायसाध्ये तु रिपौ सान्त्वमयक्रिया, इत्यादीनि अणीयांस्यपि वचनानि व्यवहारोपयोगीनि राजनैतिकानि च तत्त्वानि मार्मिकतयोपदिशन्ति । अस्य काव्यस्य प्रशस्तिविषये 'माघे सन्ति त्रयो गुणाः' (उपमा, अर्थगौरवं, पदलालित्यं च) इति प्रसिद्ध आभाणकः प्रतिश्लोकमनुभवपथमवतरति ।

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन् मुरम ।
अभिचैद्यं प्रतिष्ठासुः आसीत् कार्यद्वयाकुलः ॥१॥
सार्धमुद्धवसीरिभ्याम् अथासावासदत्सदः ।
गुरुकाव्यानुगां विभ्रत् चान्द्रीमभिनभः श्रियम् ॥ २ ॥
रत्नस्तम्भेषु संक्रान्तप्रतिमास्ते चकाशिरे ।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥ ३ ॥
गुरुद्वयाय गुरुणोः उभयोरथ कार्ययोः ।
हरिर्विप्रतिषेधं तम् आचचक्षे विचक्षणः ॥ ४ ॥
भवद्गिरामवसरप्रदानाय वचांसि नः ।
पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ॥ ५ ॥
कारागृहीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम् ।
विनाप्यस्मदलंभूष्णुः इज्यायै तपसः सुतः ॥ ६ ॥
उत्तिष्ठमानस्तु परो नोपेक्ष्यो भूतिमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ ७ ॥
न द्वेष्यं सात्वतीसूनुः यन्मह्यमपराध्यति ।
यत्तु दन्दह्यते लोकम् अदो दुःखाकरोति माम् ॥ ८ ॥
मम तावन्मतमिदं श्रूयतामङ्ग वामपि ।
ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ॥ ९ ॥
यावदर्थपदां वाचम् एवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥ १० ॥

ततो बलरामः —

जगाद वदनच्छद्मपद्मपर्यन्तपातिनः ।
नयन्मधुलिहःश्रैत्यम् उदग्रदशनांशुभिः ॥ ११ ॥
अद्धासुदेवेनादीनम् अनादीनवमीरितम् ।
वचस्तस्य सपदि क्रिया केवलमुत्तरम् ॥ १२ ॥
संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।

पुस्तकालय

सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥ १३ ॥
तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥ १४ ॥
सम्पदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ १५ ॥
समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः ।
प्रध्वंसितान्धतमसः तत्रोदाहरणं रविः ॥ १६ ॥
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिम उदकं नावतिष्ठते ॥ १७ ॥
म्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ १८ ॥
सखा गरीयान् शत्रुश्च कृत्रिमस्तौहि कार्यतः ।
स्यातामभित्रौ मित्रे च सहजप्राकृतावपि ॥ १९ ॥
उपकर्त्रारिणा सन्धिः न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ २० ॥
विधाय वैरं सामर्षं नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥ २१ ॥
म्रजीवन्यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ २२ ॥
पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥ २३ ॥
तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता ।
अलङ्घनीयताहेतुः उभयं तन्मनस्विनि ॥ २४ ॥
तुल्येऽपराधे स्वर्भानुः भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रादिम्नः स्फुटं फलम् ॥ २५ ॥
स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि ।

नेदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ २६ ॥
तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसः तपनो जातवेदसाम् ॥ २७ ॥
अकृत्वा हेलया पादम् उच्चैर्मूर्धसु विद्विषाम् ।
कथङ्कारमनालम्ब्य कीर्तिर्द्यामधिरोहति ॥ २८ ॥
अङ्काधिरोपितमृगः चन्द्रमा मृगलाञ्छनः ।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ २९ ॥
चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
स्वेदमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ? ॥ ३० ॥
अन्यदुच्छृङ्खलं सत्वम् अन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ? ॥ ३१ ॥
इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः
आस्माकदन्तिसान्निध्यात् वामनीभतभरुहः ॥ ३२ ॥
यजतां पाण्डवः स्वर्गम् अवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ॥ ३३ ॥
इति संरम्भिणो वाणीः बलस्यालेख्यदेवतः ।
सभाभित्तिप्रतिध्वानैः भयादन्ववदन्निव ॥ ३४ ॥
निशम्य ताः शेषगवीः अभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशत्कृशा ॥ ३५ ॥

—

प्रश्नाः —

(१) सभायां विवक्षितो विषयः श्रीकृष्णेन कथमुपक्षिप्तः ?

(२) स्पष्टीकुरुत —

" मे वाचो भाष्यभूता भवन्तु । सर्वः स्वार्थं समीहते ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः " ।

(३) शत्रुमित्रभावः स्थायी परिवर्तनशीलो वा ?

(४) बलरामस्य मतेन किं युक्तियुक्तं प्रतिकर्तव्यम् ?

---

(७)

चित्रदर्शनम्

परिचयः—करुणरसप्रधाननाटकानां निर्माणविषये सुप्रसिद्धो भवभूति नामा महाकविः क्रिस्ताब्दस्याष्टमे शतके विदर्भेषु पद्मपुरं नाम नगरं स्वकीयेन जन्मनाऽलंचकार। अनेन कविना महावीरचरितं, मालती-माधवं, चेति अन्यदपि नाटकद्वयं विरचितम्। उत्तररामचरितनाटकस्य सर्वोत्कृष्टत्वविषये 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति सहृदयप्रवाद एव पर्याप्तं प्रमाणम्।

एष च परिच्छेद उत्तररामचरितस्य प्रथमाङ्कादुद्धृतः। अत्रत्यः कथासन्दर्भः — लङ्कायां रावणवधादनन्तरम् अयोध्यां प्रातेन श्रीरामचन्द्रेण विजयोत्सवनिमित्तकसभाजनादिपूर्वकं सर्वेऽपि जनकप्रभृतयः स्वं स्वं स्थानं प्रतिनिवर्तिताः। पितुः स्वगृहगमनेन पतिगृहस्थितायाः कन्यायाः क्लेशो भवतीति नैसर्गिकमेव किल। तेन च दुर्मनायमानाया वैदेह्या मनोविनोदनार्थं चित्रकारलिखितचित्रदर्शनप्रसङ्गः कविनोपनिबद्धः। यद्यप्येतन्नाटकमूलभूतायां रामायणकथायां नास्यप्रसङ्गस्योल्लेखोऽस्ति, तथापि नाटकनिर्मातृणां कवीनां रसपरिपोषदृष्ट्या सामाजिकचित्ताकर्षणदृष्ट्या च मूलकथावस्तुनि न्यूनाधिक्याद्यन्यथाभावकरणे स्वातन्त्र्यं सम्प्रदायसिद्धमिति भवभूतिना निबद्धश्चित्रदर्शनप्रसङ्गः सुतरां समञ्जस एव।

तस्मिंश्च महर्षेर्विश्वामित्रात् रामस्य जृम्भकास्त्रलाभप्रभृति जानक्या हुताशनशुद्धिपर्यन्तं वृत्तकथावस्तुदर्शकानि चित्राणि लिखितानि। एतस्मिन् सन्दर्भे 'तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः, यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः, मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः' इत्यादौ क्वचिच्छास्त्रार्थदर्शनं, क्वचित् प्रशंसावादः, क्वचिच्च मार्मिको लोकानुभव इति विविधा भावा दृश्यन्ते। क्वचिच्च 'वत्स, इयमपि अपरा का?' इत्यादौ विनोदः।

तदिदं नाटकं समग्रमेव यथावकाशं स्वयमेव वाचयित्वा रसिकाश्छात्रा भवभूतेः करुणरसनिर्माणचातुरीमनुभवेयुरित्यत्र नास्ति सन्देहोऽस्माकं मनसि।

(प्रविश्य)

लक्ष्मणः—जयति जयति आर्यः। आर्य, अर्जुनेन चित्रकारेणास्मदुपदिष्टमार्यस्य चरितम् अस्यां वीथ्यामभिलिखितम्। तत् पश्यत्वार्यः।

रामः—जानासि वत्स, दुर्मनायमानां देवीं विनोदयितुम्। तत् कियानवधिः?।

लक्ष्मणः—यावदार्यायाः हुताशनशुद्धिः।

रामः—शान्तं पापम्। (ससान्त्ववचनम्)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः॥ १॥

देवि देवयजनसम्भवे, प्रसीद। एष ते जीवितावधिः प्रवादः

क्लिष्टो जनः किल जनैरनुरञ्जनीयः,

तन्नो यदुक्तमशुभं न च तत् क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा ,
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ २ ॥

सीता— भवतु आर्यपुत्र, भवतु । एहि । प्रेक्षामहे तावत् ते चरितम् ।

लक्ष्मणः—इदं तदालेख्यम् ।

सीता —(निर्वर्ण्य) क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम् ? ।

लक्ष्मणः—देवि, एतानि तानि सरहस्यानि जृम्भकास्त्राणि । यानि भगवतो भृशाश्वात् कौशिकमुपसंक्रान्तानि । तेन च ताटकावधे प्रसादीकृतान्यार्यस्य ।

रामः—वन्दस्व देवि, दिव्यास्त्राणि ।

सीता—नम एतेभ्यः ।

लक्ष्मणः—एष मिथिलावृत्तान्तः । आर्य, पश्य पश्य ।

सम्बन्धिनो वसिष्ठादीन् एष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ ३ ॥

रामः—सुश्लिष्टमेतत्,

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः ।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ ४ ॥

सीता—एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरः विवाहदीक्षिता यूयम् । अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते ।

रामः — समयः स वर्तत इवैष यत्र साम ,
समनन्दयत्सुमुखि गौतमार्पितः ।
अयमागृहीतकमनीयकङ्कणः ,
तत्र मूर्तिमानिव महोत्सवः करः ॥ ५ ॥

लक्ष्मणः--इयमार्या । इयमप्यार्या माण्डवी । इयमपि वधूः श्रुतकीर्तिः ।

सीता -- वत्स , इयमपि अपरा का ?

लक्ष्मणः— (सलज्जास्मितम् अपवार्य) अये, ऊर्मिलां प्रच्छत्यार्या । भवतु । अन्यतः सञ्चारयामि । (प्रकाशम्) आर्ये, इयताम् द्रष्टव्यमेतत् । अयं च भगवान् भार्गवः ।

सीता— (ससंभ्रमम्) कम्पिताऽस्मि ।

रामः— ऋषे, नमस्ते ।

लक्ष्मणः—एते वयमयोध्यां प्राप्ताः ।

रामः— (सास्रम्) स्मरामि हन्त, स्मरामि ।
जीवत्सु तातपादेषु नूतने दारसंग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ ६ ॥

लक्ष्मणः— एष मन्थरावृत्तान्तः ।

राम :— (सत्वरमन्यतो दर्शयन्) देवि वैदेहि ,
इंगुदीपादपः सोऽयं शृङ्गिवेरपुरे पुरा ।
निषादपतिना यत्र स्निग्धेनासीत् समागमः ॥ ७ ॥

लक्ष्मण :—[विहस्य स्वगतम्] अये , मध्यमाम्बावृत्तान्तोऽन्तरित आर्येण ।

सीता — अहो , एष जटासंयमनवृत्तान्तः ।

लक्ष्मण : —पुत्रसंक्रान्तलक्ष्मीकैः यद् वृद्धेक्ष्वाकुभिर्धृतम् ।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥ ८ ॥

सीता — एषा प्रसन्नसलिला भागीरथी ।

रामः — रघुकुलदेवते , नमस्ते ।

लक्ष्मणः — एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि
वनस्पतिः कालिन्दीतटे वटः श्यामो नाम ।

(रामः सस्पृहमवलोकयति ।)

सीता — स्मरति वा तं प्रदेशमार्यः ?

रामः — अयि , कथं विस्मर्यते ?

लक्ष्मणः —एष विन्ध्याटवीमुखे विराधसंवादः ।

सीता — अलं तावदेतेन । पश्यामि तावत् आर्यपुत्रस्वहस्त-
धृततालवृन्तातपत्रम् आत्मनोऽत्याहितं दक्षिणा-
रण्यपथिकत्वम् ।

लक्ष्मणः— अयं जनस्थानमध्यगो गिरिः प्रस्रवणो नाम । एष
पञ्चवट्यां शूर्पणखाविवादः ।

सीता — हा आर्यपुत्र, एतावत्ते दर्शनम् ।

रामः — अयि वियोगत्रस्ते , चित्रमेतत् ।

सीता — यथा तथा वा भवतु । दुर्जनोऽसुखमुत्पादयति ।

रामः — हन्त , वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति ।

लक्ष्मणः—

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना ,
तथा वृत्तं पापैर्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितैः ,
अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ ९ ॥

सीता — (सास्रमात्मगतम्) अहो दिनकरकुलानन्दन एवमपि
मम कारणात् क्लान्त आसीत् ।

लक्ष्मणः —(रामं निर्वर्ण्य साकूतम्) आर्य किमेतत् ?

अयं तावत् बाष्पस्त्रुटित इव मुक्तामणिसरो ,
विसर्पन् धारामिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया ,
परेषामुन्नेयो भवति चिरमाध्मातहृदयः ।

रामः —बःस ,

तत्कालप्रियजनविप्रयोगजन्मा ,
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निमनसि पुनर्विपच्यमानो ,
हृन्मर्मव्रण इव वेदनां तनोति ॥ ११ ॥

सीता —हा धिक् , हा धिक् । अहमप्यतिभूमिं गतेन रणरण-केन आर्यपुत्रशून्यमिवात्मानं पश्यामि ।

लक्ष्मणः — (स्वगतम्) भवतु आक्षिपामि । (चित्रं विलोक्य प्रकाशम्) अथैतन्मन्वन्तरपुरुषस्य तत्रभवतस्तात-जटायुषः चरित्रविक्रमोदाहरणम् ।

सीता — हा तात , निर्व्यूढस्तेऽपत्यस्नेहः ।

रामः — हा तात , काश्यप शकुन्तराज , क्व नु खलु पुनः स्वादृशस्य महतस्तीर्थभूतस्य साधोः सम्भवः ।

लक्ष्मणः—अयमसौ जनस्थानस्य पश्चिमतः कुञ्जवान् नाम पर्वतो दनुकदम्बाधिष्ठितो दण्डकारण्यभागः । तदिद-ममुष्य परिसरे मतङ्गाश्रमपदम् । तत्र श्रमणी नाम सिद्धा शबरतापसी । तदेतत्पम्पाभिधानं पद्मसरः ।

सीता — यत्र किलार्यपुत्रेण विच्छिन्नामर्षधीरत्वं प्रमुक्तकण्ठं प्ररुदितमासीत् ।

रामः—देवि, परं रमणीयमेतत् सरः ।
एतस्मिन्मदकलमल्लिकाश्रपक्ष—
व्याधूतस्फुटदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले,
सन्दृष्टाः कुवलयिनो मया विभागाः ॥ १२ ॥

लक्ष्मणः—अयमार्यो हनूमान् ।

रामः—दिष्ट्या सोऽयं महाबाहुः अञ्जनानन्दवर्धनः ।
यस्य शौर्येण कृतिनो वयं च भुवनानि च ॥ १३ ॥

सीता—वत्स, एष स कुसुमितकदम्बताण्डवितबर्हिणः
किंनामधेयो गिरिः ?

लक्ष्मणः—सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मिन्
नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।
आर्येणास्मिन्—

रामः—.....विरम विरमातःपरं न क्षमोऽस्मि,
प्रत्यावृत्तः स पुनरिव मे जानकीविप्रयोगः ॥ १४ ॥

लक्ष्मणः—अतः परमार्यस्य तत्रभवतां राक्षसानां चापरिसंख्या-
न्युत्तरोत्तराणि कर्माश्चर्याणि । परिश्रान्ता चेयमार्या ।
तद्विज्ञापयामि विश्राम्यतामिति ।

प्रश्नाः (१) 'नैसर्गिकी सुरभिगः कुसुमस्य सिद्धा, मूर्ध्नि स्थितिः' इत्यादिरामवचनस्य कोऽभिप्रायः ?

(२) को नाम निषादपतिः ? कथं च स स्निग्धः ?

(३) चित्रदर्शने को वृत्तान्तः किमर्थं चान्तरितो रामेण ?

(४) इक्ष्वाकुवंशे वृद्धचरितव्रतं कीदृशम् ?

(५) हनूमानञ्जनानन्दवर्धनः कथम् ?

---

(८)

महाश्वेतादर्शनम्

परिचयः— अस्ति किल बाणभट्टो नाम महाकविर्गद्यकाव्यनिर्माणे प्रथितयशाः । क्रिस्ताब्दस्य सप्तमे शतके राज्ञा हर्षवर्धनेन प्रदत्ताश्रयोऽयं विविधान् गद्यग्रन्थान्, नाटकानि च रचयामास । अस्य जन्मदेशस्तु ऐतिहासिकैरपि नाद्यावधि निर्धारितो दृश्यते । तद्विरचितगद्यग्रन्थेषु हर्षचरितं कादम्बरी चेति द्वौ सुविख्यातौ ग्रन्थौ । साहित्यवाङ्मये प्राथमिकग्रन्थानधीत्य काव्यरसास्वादसामर्थ्यसम्पन्न एवास्य ग्रन्थस्य माधुर्यस्वादक्षमो भवति । अत एव साहित्यवाङ्मये प्रौढग्रन्थेषु अस्य ग्रन्थस्य अन्तर्भावो भवति । विशेषतश्च दीर्घसमासप्रचुरा विविधालङ्कारभूयिष्ठा चेतदीया रचनाशैली ।

तदीयकादम्बरीग्रन्थादुद्धृतोयं गद्यभागः । अत्र च दिग्विजयार्थं प्रस्थितश्चन्द्रापीडनामा राजकुमारो हिमालयसमीपे किन्नरमिथुनमनुधावन्नच्छोदसरो विलोक्य तत्र च विश्रान्तिसुखमनुभूयाकस्मादेव समुद्भूतगन्धर्वगीतध्वनिश्रवणकुतूहलाकृष्टहृदयो गीतरवानुसारेण सुदूरं प्रस्थाय शूलपाणेः किमपि सिद्धायतनं ददर्श । तत्र च वीणावादनोपस्कृतगानप्रबन्धेन महादेवार्चनपरायणां भुवमवतीर्णां देवकन्यामिवोपलक्ष्यमाणां गानविद्याप्रवणां रमणीयाकृतिं काञ्चित्कन्यकां ददर्शेत्येतावत् कथावस्तु ।

अत्राच्छोदसरसः सर्वेन्द्रियाह्लादकत्वं कविनोपवर्णितमतीव मनोहारि । तथा च तेषु तेषु स्थलेषु कथाप्रसङ्गानुसारेणैकस्यैव विशेष्यस्य सुदीर्घ-समासग्रथितबहुतरविशेषणविन्यासेन विविधपरिस्थितिवर्णनेन वस्तुवृत्त साक्षात्कारसम्पादने विद्यमानमस्य कवेः सामर्थ्यमनन्यसाधारणम् । तथा सूक्ष्मतरवस्तुस्वभावनिरीक्षणेन कृतं तत्तद्वस्तुवर्णनमपि वाचकानां चित्त तरलीकरोति । यथा–अत्रैवेन्द्रायुधस्य स्वभाववर्णनम्, वृक्षवर्णने चपल-स्वभावानां वानराणां वर्णनं चेति । येषां वाग्मित्वसम्पादनेऽभिलाषो वर्तते, तादृशैर्विद्योपासकैः कादम्बरीसदृशानि गद्यकाव्यानि मुहुर्मुहुर्वाचयित्वैव स्वकीयरसनाञ्चलस्य तीक्ष्णधारता सम्पादनीया, न तु कदाचिदपि दीर्घ-समासनिमित्तकोऽनादरः करणीय इति सनिर्भरमावेद्यते ।

आलोकनमात्रेणैवापगताध्वखेदो मनस्येवमकरोत् । अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणमेतदालक्ष्यैकयतः अच्छो-दसरः सफलतामुपगतम । अद्य परिसमाप्तमीक्षणयुगलस्य द्रष्टव्य-दर्शन फलम् । आलोकितः खलु रमणीयानामन्तः । दृष्ट आह्लादनी-यानामवधिः । वीक्षिता मनोहराणां सीमान्तलेखा । विलोकिता दर्शनीयानामवसानभूमिः । इदमुत्पाद्य सरःसलिलममृतमु-पादयता वेधसा पुनरुक्तताभिव नीता स्वसृष्टिः । अतिविमलतया चक्षुषः प्रीतिमुपजनयति, शिशिरतया स्पर्शसुखमुपाहरति, कमलसुगन्धि-तया घ्राणमाप्याययति, हंसमुखरतया श्रुतिमानन्दयति, स्वादुतया रसनामाह्लादयति । नियतं चास्यैव दर्शनतृष्णया न परित्यजति भगवान्कैलासनिवासव्यसनमुमापतिः । नूनं चास्मादेव सलिल-लेशमादाय महाप्रलयेषु प्रलयपयोदा दुर्दिनान्धकारितदशदिशः प्लावयन्ति भुवनान्तराणि ।

इति विचारयन्नेव तस्य शिलाशकलकर्कशवालुकाप्रायं, अरुन्धतीदत्तदिनकरार्घ्यपयःपर्यस्तरक्तकमलशोभितम्, उपकूलशिलातलोपविष्टजलमानुषनिषेव्यमाणातपम्, अभ्यर्णतया कैलासस्य स्नानागतमातृमण्डलपदपंक्तिमुद्राङ्कितम्, अवकीर्णभस्मसूचितमग्नोत्थितगणवृन्दोद्धूलनम्, अवगाहावतीर्णगणपतिगण्डस्थलगलितमदप्रस्रवणसिक्तं दक्षिणं तीरमासाद्य तुरगादवततार। अवतीर्य च व्यपनीतपर्याणमिन्द्रायुधं कृत्वा, क्षितितललुठितोत्थितं च गृहीतकतिपययवसग्रासं सरोऽवतार्य, पीतसलिलमिच्छया स्नानं चोत्थाप्यान्यतमस्य समीपवर्तिनस्तरोर्मूलशाखायामपगतखलीनं शृङ्खलया कनकमय्या चरणौ बद्ध्वा, कृपाणिकावलूनानक्षिप्त्वा चाग्रतः कतिचित्सरस्तीरदूर्वाप्रवालकवलान् पुनरपि सलिलमवततार। ततश्च प्रक्षालितकरचरणयुगलश्चातक इव कृत्वा जलमयमाहारं सीकरार्द्रपुष्करोपशोभितकरः सरःसलिलादुदगात्। प्रत्यग्रभग्नशिशिरैः कमलिनीपलाशैः शिलातले स्वस्तरमास्तीर्य निधाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद।

मुहूर्तं विश्रान्तश्च सरस उत्तरतीरप्रदेशे समुच्चरन्तमुन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथमाकर्णितं श्रुतिसुभगवीणातन्त्रीझंकारमिश्रममानुषं गीतशब्दमश्रौषीत्। श्रुत्वा च कुतोऽत्र विगतमर्त्यसम्पातप्रदेशे गीतध्वनिसम्भूतिरिति समुपजातकौतुकः कमलिनीपत्रस्रस्तरादुत्थाय तामेव गीतसम्पात सूचितां दिशं चक्षुः प्राहिणोत्। अतिदवीयस्तया तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि न किञ्चिदद्राक्षीत्। कुतूहलवशाच्च गीतध्वनिप्रभवजिज्ञासया कृतगमनबुद्धिर्दत्तपर्याणमिन्द्रायुधमारुह्य प्रियगीतैः प्रथमप्रस्थितैरप्रार्थितैरपि वनहरिणैरुपदिश्यमानवर्त्मा, सप्तच्छदबकुलैलालवङ्गलवलीलतालोलकुसुमसुरभिपरिमलया,

अलिकुलविरुतिमुखरितया तमालनीलया सरस्तीरवनलेखया निमित्तीकृत्य तं गीतध्वनिमभिप्रतस्थे ।

क्रमेण च सम्मुखागतकैलासमारुतैरभिनन्द्यमानस्तं प्रदेशं गत्वा सर्वतो मरकतहरितैर्हारिहारीतरुतिरमणीयैर्भ्रमद्भृंगराजनखजर्जरितजरठकुड्मलैरुन्मदकोकिलकुलकवलीकृतसहकारकोमलाम्रपल्लवैरुन्मदषट्चरणचक्रवालवाचालितविकचचूतकलिकैरचकितचकोरचुम्बितमरिचांकुरैश्चम्पकपरागपुञ्जपिञ्जरकपिञ्जलजग्धपिप्पलीफलैः फलभरनिकरनिपीडितनिबिडदाडिमनीडप्रसूतकलविङ्कैः प्रक्रीडितचपलकपिकुलकरतलताडनतरलितताडीपुटैरन्योन्यकलहकुपितकपोतपक्षपालीपातितकुसुमैः शुकशतमुखनखशिखरशकलितफलरफीतैर्दृष्टिहारिभिः पादपैः परिवृतं चन्द्रप्रभनाम्नस्तस्य सरसः पश्चिमे तीरे कैलासमहीरुहस्य ज्योत्स्नावदातया प्रभया धवलयतस्तं प्रदेशं भूतलभागसन्निविष्टं भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत् ।

तत्र च पवनोध्दूतैरितस्ततः समापतद्भिः केतकीगर्भधूलिभिर्धवलीक्रियमाणकायः पशुपतिदर्शनहेतोर्बलादिव प्रतिपाद्यमानो भस्मव्रतं प्रविश्य चाद्राक्षीच्चतुःस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितं शुचिभिर्मन्दाकिनीपुण्डरीकैः कृतार्चनममलमुक्ताशिलाघटितलिङ्गमशेषत्रिभुवनवन्दितचरणं चराचरगुरुं चतुर्मुखं भगवन्तं त्र्यम्बकम् । तस्य च दक्षिणां मूर्तिमाश्रित्यामिमुखमासीनामुपरचितब्रह्मासनाम्, अचिरस्नानावस्थितविरलवारिकणतयाप्रणामलग्नपशुपतिचरणभस्मचूर्णाभिरिव जटाभिरुद्भासितशिरोभागां, जटापाशग्रथितमुक्तमाङ्गेन मणिमयं नामाङ्कमीश्वरचरणद्वयमुद्वहन्तीम्, भस्मालंकृतललाटपट्टिकां, स्थूलमुक्ताफलाक्षवलयाधिष्ठितकण्ठभागां, मण्डलीकृतब्रह्मसूत्रपवित्रीकृतकायां, त्रिपुण्ड्रकावशेषभस्मपाण्डुरेण दक्षिणकरेण वीणामास्फालयन्तीम् अनेकभावनानुविद्धया गीत्या देवं विरूपाक्षमुपवीणयन्तीं, निर्ममां निरहङ्कारां, निर्मत्सराममानुषा-

कृतिम् , अष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां , प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श ।

प्रश्नाः —

(१) भौगोलिकदृष्ट्या कुत्र विद्यतेऽच्छोदं नाम सरः ?

(२) चन्द्रापीडस्य महाश्वेतादर्शने निमित्तं किम् ?

(३)किन्नराणामाकृतिः कीदृशी श्रूयते ?

(४) अच्छोदसरः सिद्धायतनं च स्वशब्दैर्वर्णयत ।

(५) प्रवासकाले अश्वः कैरुपकरणैः सज्जीक्रियते ?
कथं च तस्य व्यवस्था क्रियते ?

---

(९)

किरातार्जुनौ

परिचयः— गद्यमिश्रपद्यात्मकेषु चम्पूकाव्येषु रामायणचम्पूतो भारतचम्पूरतीव प्रौढेति साहित्यविदां मर्यादा । यदन्तरं कालिदासकाव्यभारविकाव्ययोः तावदेवान्तरं रामायणचम्पूभारतचम्प्वोरपि । एतावतालपेनापि विवेचनेनैतस्य भारतचम्पूग्रन्थस्य महत्वं वर्णितं भवति । सोऽयं ग्रन्थो वाग्देवतायाः सरस्वत्याः साक्षात् प्राणेभ्योऽपि प्रियतर इति ग्रन्थान्ते ग्रन्थकारोऽनन्तभट्टनामा कविः यत् स्वयं कथयति ' दिगन्तरलुठत्कीर्तिरनन्त-

कविकुञ्जरः । प्राणैस्तुल्यं सरस्वत्याः प्राणैरीच्चम्पुभारतम् ' इत्यादिना तत् तदीयकाव्यानुभवान्तरं यत्सत्यं सर्वथैव यथार्थमवभासते । तदीय-च्चम्पूग्रन्थाच्चतुर्थस्तबकादुद्धृतोऽयं भागः । एतस्य सन्दर्भस्तु — इन्द्रकीलपर्वते तपश्चरतोऽर्जुनस्याश्रमसमीप आगतं कञ्चित् वनवराहम्, अर्जुनं परीक्षितुकामः किरातरूपधारी शङ्करः अर्जुनश्च बाणाभ्यां युगपदेव विव्यधतुः । तन्निमित्तेन कलहायमानयोरर्जुनकिरातयोर्द्वन्द्वयुद्धं प्रवर्तते । तदाऽर्जुनस्य बाहुपराक्रमेण निरतिशयशिवभक्त्या च प्रसन्नो धूर्जटिस्तं वरप्रदानेनानुजग्राहेति ।

अस्य कवेः सरस्वतीप्रसादलब्धा काव्यकल्पनाशक्तिः स्फूर्तिशालिनी प्रतिभा च स्थाने स्थानेऽनुभवगोचरीभवति — ' ताटङ्कमेव सहसे न कपोल-मित्रम्, मनसा या त इषुः श्रुतिं जजाप ' इत्यादौ । काव्यनिर्माणप्रसङ्गे वैदिकमन्त्राणां तदर्थस्य चानुसन्धानं नामातीव दुर्लभो विषयः यतो वैदिकी भाषा लौकिक्या भाषाया बहुशो विभिद्यते । अयं तु कविरुभयोरपि भाषयोः प्रवीण इति शङ्करकथायां प्रस्तुतायां शङ्करप्रिययजुर्वेदीयरुद्रा-ध्यायगतस्य ' या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय ' । इति मन्त्रस्य प्रतीकोद्धरणेन सुस्पष्टं प्रतीयते । अथ च किरातरूपं परित्यज्य स्वस्वरूपेण प्रकटीभूतस्य शङ्करस्यार्जुनकृत-साक्षात्कारवर्णनं विविधरसभावादिचर्वणाजन्यमानन्दमास्वादयति । अत एव सोऽयं गद्यभागः शिवस्तुतिपरः पाठकैर्मुखोद्गतः करणीय इत्यास्तां तावत् ।

क्षोदयन्नथ महीं खुरपातैः कोऽपि कोपकुटिलो वनकोलः ।
घोरघूत्करणघोणमुपागात्, कुक्षिमाश्रमभुवः कुरुसूनोः ॥ १ ॥

तं रौद्रवपुषं वराहं वीक्ष्य पार्थो नियमान्निवृत्य करेण शरासनमादाय यदा जिघांसुर्जवादभिदुद्राव तावदेवैतेन धनुराकृष्य तमेवाभिधावन् शबरो ददृशे ।

मा मुञ्च बाणं मदनुद्धृतेऽस्मिन् ,
अपेहि जाल्मेति किरातनेतुः ।
वचः स लक्ष्यं मनसो न कुर्वन् ,
वराहमस्त्रस्य चकार लक्ष्यम् ॥ २ ॥

ततश्चोभाभ्यामपि युगपत्प्रयुक्तावुभौ शिलीमुखौ घोरं तं वराहमन्तकातिथिमकुरुताम् । ' इत्थं मदाश्रममागतं मया च प्राग् लक्ष्यीकृतं सूकरमेतं प्रहरन्तं मदीयशापदण्डयोग्यमपि भवन्तं दयया सहे ' इति ब्रुवन्तमर्जुनं किरातः सस्मितमवादीत्—

मृदुबुद्धिरङ्ग वचसैव लक्ष्यसे , मृगहिंसनं विपिनसीमनीदृशम् ।
शतशः स्वधर्म इति पठ्यते बुधैः शबरस्य वा वद तपोधनस्य वा ॥३॥

अर्जुनः —

यस्माद्वनेचरकुलाधम जल्पसि त्वम् ,
एवं मनः पुलकयन् स्वजनस्य दृतः ।
तस्मादसंशयमुपान्तजुषः किरात्याः ,
ताटङ्कमेव सहसे न कपोलमित्रम् ॥ ४ ॥

अथ भिल्लमल्लकुरुवल्लभावुभौ ,
परिफुल्लभल्लकुलशल्यपल्लवैः ।
स्थगितावलोकसरणिं दिवौकसां ,
समरं भयङ्करजवं वितेनतुः ॥ ५ ॥

सरुषीव हरे विकृष्टचापे सशरं शैलसुतापि जातशङ्का ।
मघवत्सुतमङ्गलाय देवी मनसा ' या त इषुः श्रुतिं ' जजाप ॥६॥

निःस्वे निषङ्गयुगले नितराममर्षी ,
चापेन मूर्ध्नि गिरिशं पुर एव देव्याः ।
पार्ष्णिप्रमुक्तवरणिः प्रजहार वेगात् ,
कुर्वन् व्रणं स कुटिलं शशिखण्डमित्रम् ॥ ७ ॥

सोऽयं गाण्डीवदण्डोऽपि तस्य जटावनकुटुम्बिभिः कुण्डलिभिर्भक्षित इव तत्क्षणं नालक्ष्यत । ततोऽयं दैवविपर्ययः किम् ? उतामुष्य माया किम् ? इति चिन्तापरतन्त्रेणाऽपि धैर्यदत्तहस्तोत्साहेन 'तिष्ठ तिष्ठ जडात्मन् एवमर्जुनं निर्जित्य यशोऽर्जितुमिच्छसि' इति कृततर्जनेन सितवाहनेन वृषवाहनं प्रति नियोद्धुमारेभे । तदनु च परस्परमुष्टिप्रहारवृष्टिपरिमृष्टवनकुसुमपरागभस्माङ्गरागौ सरभसमेकेन बाहुना जटासु गृहीत्वापरेण बाहुना वलयितगलनालौ तौ शबरतपोधनौ क्रमेण हिमवतो महत्यामधित्यकायामापतताम् ।

पार्थस्य तस्य भुजयोः परमेश्वरोऽसौ,
वीर्यं विलोक्य युधि विस्मयमानचेताः ।
चापव्रणे सुरनदीकणसेकशङ्काम् ,
अप्युत्सृजन्मुहुरकम्पयदुत्तमाङ्गम् ॥ ८ ॥

पार्थस्तु परुषतरपशुपतिप्रयुक्तमुष्टिप्रहारमूर्च्छितोऽप्यचिरादेव लब्धचेतनः शनैरुत्थाय पुरतो घण्टाघणघणात्कारसहचरेण कण्ठगर्जितेन कर्णयोः कल्पितसुधारसमोक्षे महोक्षे निषेदिवांसं , भुजमूलप्रसारितगिरिजापाणियुगलनखराङ्कुरधोरणीद्विगुणीकृतहारमणिरमणीयवक्षसं, पारिषद्गणाञ्जलिकमलवनमध्यराजहंसायमानं, मार्दवभरितशार्दूलचर्मनिर्मितपल्ययनपर्यङ्कोपरिभागतिर्यगर्पितचरणपल्लवसंवाहनपरेण शिलादकुमारेण च दर्पदुर्ललननिवारणाय मुखबन्धनकनकशृङ्खलेन निरुध्य मुहुर्मुहुः करपुटास्फालितककुदशृङ्गेण भृङ्गिणा च लक्ष्यमाणोभयपक्षभागं, गाण्डीवदण्डताडन-

परिपीडितचूडाशशिनमाश्वासयितुमवतरद्भिरङ्गुलिकरैरिव सुरतरु-
कुसुमवर्षैरवकीर्यमाणं, जटाभस्मकुशचीरधारिभिस्तैरेव चतुर्भि-
राम्नायपुरुषैः परिपाठ्यमानशतरुद्रीयबिरुदप्रबन्धम्, अम्बरे
सविधमवलम्बमानैस्तुम्बुरुप्रभृतिभिः सुरवैणिकैरुपवीण्यमानभक्त-
जनरक्षणापदानप्रकरणं, कर्णपूरीकृततमालमञ्जरीमधुमिषेण कटा-
क्षात्साक्षात्कृपामिव वर्षन्तं, प्रज्वलद्भिः परिष्कारपन्नगफणा-
रत्नैर्नूतनैः शरव्रणैरिवानुरज्यमानावयवम्, अवतंसशशिकलापरि-
गलितकिरणधारापातशीतासहिष्णुतयेव दन्तपटगर्भवर्तिना स्मितेन
सूचितहृदयप्रसादं, भगवन्तं महादेवमुद्वीक्ष्य पक्ष्मतटरुहविट-
पिसमुत्पाटनपटुभिः प्रमोदाश्रुपूरैर्नदीमातृकायमाणपुलकाङ्कुरः सवि-
नयमुपसृत्य पादारविन्दयोः सहस्रकृत्वः प्राणंसीत्।

स्वामिन् मया जडधिया त्वयि देवदेवे,
वाचा शरेण धनुषा दृढमुष्टिना च।
यत्ते चतुर्विधमकारि रणे तदागः,
क्षन्तव्यमद्य भवता करुणार्णवेन ॥ ९ ॥

इति विज्ञापयन्तमेनं पारिजातपल्लवतल्लजप्रतिमल्लस्य पाणितलस्य
परामर्शनेन प्रमुषितव्रणवेदनाङ्गं पुष्पधन्वनमनङ्गशासनोप्येव-
मवादीत्।

यथा तृतीयेन युधि प्रवीर,
तवापराधेन भवामि तुष्टः।
तथा न भक्त्या तपसां विभूत्या,
तरुप्रसूनार्चनया च बह्व्या ॥ १० ॥

प्रश्नाः —

(१) अर्जुनस्याल्पबुद्धित्वं मृगयाधर्मानभिज्ञत्वं च किरातेन कथं प्रकटीकृतम् ?

(२) अर्जुनेन किरातविषये कृतश्चतुर्विधोऽपराधः कः ?

(३) सन्दर्भपुरःसरं स्पष्टीकुरुत –' तवापराधेन भवामि तुष्टः ' । 'प्लवंगकेतनोऽप्यनंगशासनमेवमवादीत्' । 'मनसा या त इषुः श्रुतिं जजाप' ।

———

(१०)

महाभाष्यपरिच्छेदौ

परिचयः — जगति प्रचलितानां सर्वासामपि भाषाणां व्याकरणं नाम मूलाधारभूतम् । यस्याभावे जीवन्त्योऽपि भाषा मृता इवोद्वेगं जनयन्ति । न केवलं भाषायामेव व्याकरणस्योपयोगः किन्तु दर्शनेष्वपि । अत एव वदन्ति ' काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् । मुखं व्याकरणं स्मृतम् । तथापि पठ पुत्र व्याकरणम् ' इत्यादि । तस्मिंश्च व्याकरणे सूत्रभाष्यवार्तिकादय आकरग्रन्थाः समुपलभ्यन्ते , येषामाधारेण शताधिका वादग्रन्थाः प्रकरणग्रन्थाश्चाधुनिकैर्विरचिता दृश्यन्ते ।

तत्र च पतञ्जलिर्नाम व्याकरणमहाभाष्यस्य प्रणेता । अयं क्रिस्ताब्दात् पूर्वं द्वितीयशतके हिमवत उपत्यकासु गोनर्ददेशे स्वीयेन जन्मना भारतवर्षं विभूषयामासेति ज्ञायते । एष च शेषावतारभूत इत्यपि वदन्ति । युक्तं चैतत् । कथमन्यथा एकस्यैव महामुनेः पतञ्जलेर्गम्भीरदुरूहेषु व्याकरण–योग–वैद्यशास्त्रेषु निरंकुशा धारावाहिनी बुद्धिः प्रसरेत् । दैवीं सम्पदं विना

सद्गुणानां तीव्राविर्भावः सर्वथा अशक्यसम्भवः। योगशास्त्रे वैद्यशास्त्रे च महर्षेः पतञ्जलेः प्रभुत्वमासीदिति वक्ष्यमाणपद्येन ज्ञायते—

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि'। इति

अनेन विरचितस्य महाभाष्यस्य प्रथमाध्यायस्थितपस्पशाह्निकादुद्धृतः प्रथमः परिच्छेदः। तत्र व्याकरणशास्त्रस्य प्रयोजनकथनावश्यकत्वं व्याकरणशास्त्रनिर्माणरीतिश्चेति विषयद्वयं प्राधान्येनाभिहितम्। यथा हि वैदिकवाङ्मये प्रयोजनकथनं विनापि तदध्ययनेऽध्येतारस्तत्परा भवन्ति तथा विनापि प्रयोजनकथनं व्याकरणं किमिति नाधीयीरन्निति शङ्कामुपन्यस्य हृदयंगमया सरण्या वैदिकवाङ्मयदृष्टान्तवैषम्यमुद्भाव्य भाष्यकारेण व्याकरणप्रयोजनकथनावश्यकता संसाधिता। तथा द्वितीयविषयेऽपि इन्द्रबृहस्पत्यादीनां महानुभावानामपि मतिवैशाल्यमगाधव्याकरणशास्त्रपारदर्शनविषये तत्कालीनसरण्या अपर्याप्तमेवाभूदतोऽन्या सरणिरनुसरणीयेति आख्यायिकोपन्यासेन प्ररोचनामुत्पाद्य व्याकरणशास्त्रमाहात्म्यं विशदीकृतम्।

द्वितीयस्तु परिच्छेदः तस्मिन्नेव प्रथमाध्याये प्रत्याहाराह्निकादुद्धृतः। अस्मिंश्च परिच्छेदे अर्थप्रतिपादकत्वं कस्येति विचारः कृतः। वाक्योच्चारणे कृतेऽर्थप्रतिपत्तिस्ततश्च कार्यप्रवृत्तिर्झटित्येव भवतीति लौकिका अपि जानन्ति। सेयमर्थप्रतीतिः किं वाक्यशक्त्या जाता, उत पदशक्त्या, आहोस्वित् वर्णशक्त्या इत्येवमादिकं सूक्ष्मं विचारं ऋते शास्त्रकारेभ्यः केऽन्ये कुर्वीरन्? एकस्मिन्वाक्ये श्रुते तदन्तःपातीनि पदानि तदीयाश्च वर्णाः क्रमिका अपि युगपदेव श्रुता इव प्रतिभासन्ते। क्षणिका वर्णाः क्षणान्तरे नोपलभ्यन्ते। एवं स्थितेऽपि वर्णपदवाक्यरूपाणां तेषां शब्दानामेतावान्महिमा यत् अतीतानागतसन्निहिततिरोहितादिभेदभिन्नं विविधमितिवृत्तजातं सद्योघटमानमिवानुभूतिपथमवतारयन्ति।

तदत्रैतादृशानां शब्दानां मध्येऽर्थवान् कः ? इति विचारो युक्त एव । अयं च विचारो भाष्यकारैः सरसया बालबोधिन्या च पद्धत्या प्रदर्शितः । प्रश्नोत्तरभावेन लघुवाक्यैः प्रमेयप्रतिपादनमपि कृतम् । प्राचीनभाष्यवार्तिकादयो ग्रन्था दुरवबोधा इति कुदृष्टयो लोका जानन्ति वदन्ति च । परन्तु स्वयमेव ग्रन्थानुद्धृत्य यदा तदीयं भाषासौन्दर्यमवलोक्यते तदा नूनमेव कश्चिदनिर्वचनीयानन्दोऽनुभूयत इत्यलं विस्तरेण ।

---

(१) किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते , न पुरन्यदपि किञ्चित् ? ओमित्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान् पठन्ति । पुराकल्प एतदासीत् , संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति — वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः । अनर्थकं व्याकरणमिति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे – इमानि प्रयोजनानि , अध्येयं व्याकरणमिति ।

शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् ? किं शब्दोपदेशः कर्तव्यः , आहोस्वित् अपशब्दोपदेशः ; आहोस्वित् उभयोपदेशः ? अन्यतरोपदेशेन कृतं स्यात् । तद्यथा—भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते, अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । एवमिहापि । यदि तावत् शब्दोपदेशः क्रियते , गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् गाव्यादयोऽपशब्दा इति । अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद् गौरित्येष शब्द इति । किं पुनरत्र ज्यायः ? लघुत्वात् शब्दोपदेशः । लघीयान् शब्दोपदेशः, गरीयानप-

शब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा—गौरित्यस्य शब्दस्य गावी – गोणी – गोता – गोपोतलिकेत्येवमादयोऽपभ्रंशाः ।

अथैतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः — गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ? नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते —बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच ; नान्तं जगाम । बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः । न चान्तं जगाम । किं पुनरद्यत्वे । यः सर्वथा चिरं जीवति, वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति —आगमकालेन , स्वाध्यायकालेन , प्रवचनकालेन , व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः । कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । किं पुनस्तत् ? उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः । कथंजातीयकः पुनरुत्सर्गः कर्तव्यः , कथंजातीयकोऽपवादः ? सामान्येनोत्सर्गः कर्तव्यः ; तस्य विशेषेणापवादः ।

(२) इदं विचार्यते—किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः ? अर्थवन्तो वर्णाः । वर्णव्यत्यये चार्थान्तरगमनात् मन्यामहे अर्थवन्तो वर्णा इति । कूपः सूपो यूप इति । कूप इति सककारेण कश्चिदर्थो गम्यते, सूप इति ककारापाये सकारोपजने च अर्थान्तरं गम्यते । यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते । तेन मन्यामहे यः कूपे कूपार्थः स ककारस्य । यः सूपे सूपार्थः स सकारस्य । यो यूपे यूपार्थः स यकारस्य इति ।

सङ्घातार्थवत्वाच्च मन्यामहे अर्थवन्तो वर्णा इति । येषां सङ्घाता अर्थवन्तः, अवयवा अपि तेषामर्थवन्तः । येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः । तद्यथा--एकश्चक्षुष्मान दर्शनसमर्थः, तत्समुदायश्च शतमपि समर्थम् । एकश्च तिलस्तैल-दाने समर्थः, तत्समुदायश्च खार्यपि तैलदाने समर्था । येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः । तद्यथा— एकोऽन्धो दर्शनेऽसमर्थः, तत्समुदायश्च शतमप्यसमर्थम् । एका च सिकता तैलदानेऽसमर्था ; तत्समुदायश्च खारीशतमप्यसमर्थम् ।

अनर्थकास्तु वर्णाः । कुतः ? प्रतिवर्णमर्थानुपलब्धेः । न हि प्रति-वर्णमर्था उपलभ्यन्ते ।

उभयमिदं वर्णेषूक्तम्, अर्थवन्तः अनर्थका इति च । किमत्र न्याय्यम् ? उभयम् इत्याह । कुतः ? स्वभावतः । तद्यथा — समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न । न चेदानीं कश्चिदर्थवान् इति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम । कश्चिद्वा अनर्थक इति कृत्वा सर्वैरनर्थकैः ।

प्रश्नाः —

(१) भाष्यकाराणां भाषा कीदृशी ? तत्रत्यो गुणः कः ?

(२) भाष्यकारस्य पतञ्जलेः व्याकरणादन्यत्र कस्मिन् शास्त्रे गतिरासीत् ?

(३) साधुशब्दोपदेशासाधुशब्दोपदेशयोः कतरः पक्षो ज्यायान् ?

(४) शब्दप्रतिपत्तौ अमोघोपायः कः ?

(५) भाष्यकारमतेन वर्णानामर्थवत्त्वे का युक्तिः ?

(६) अत्रत्यः सिद्धान्तः संग्रहेण सयुक्तिकं लेखनीयः ?

(११)

शकुन्तला पतिगृहं प्रतिष्ठते

परिचयः —काव्येषु दृश्यकाव्यानि श्रव्यकाव्यानीति च द्विविधता। येषां श्रवणेन वाचनेन वा रसास्वादोपयोगिता तानि श्रव्यकाव्यानि। येषां तु साभिनयप्रयोगसाध्यदर्शनसहकृतं श्रवणमेव रसास्वादोपयोगि भवति तानि दृश्यकाव्यानि इति प्रथन्ते। एतानि च दृश्यकाव्यानि दशरूपकाणीत्यपि व्यवह्रियन्ते। तेषु प्रधानत्वात्प्रमुखत्वाच्च नाटकस्य पुरातनानां महाकवीनां स्वारसिकी तत्र प्रवृत्तिः। नाटकेष्वपि 'काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला। तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्' इति साहित्यविदां प्रसिद्ध्या शाकुन्तलनाटकस्य प्रथमगणनीयता। अस्य नाटकस्य कर्ता प्रसिद्धो महाकविः कालिदासः। तदीयमितिवृत्तादिकं च षोडशपाठप्रस्तावे द्रष्टव्यम्।

अत्र चोद्धृतो भागश्चतुर्थाङ्कगतः। अत्र पुत्रप्रेमास्पदं शकुन्तलां मृगयाव्याजेनाश्रमपदं प्राप्ते महाराजदुष्यन्ते बद्धभावां तेन च परिणीतामन्तर्दशा ज्ञातवान् काश्यपस्तां सानन्दमभिनन्द्य पतिगृहं प्रेषयितुकामो दुहितृवियोगप्रयुक्तां वेदनामनुभवति। एवं गुरुजनाधिकारमनुध्यायन् तामुपदिशति, तथा दुष्यन्तं सन्दिशति च; तत्र 'यास्यत्यद्य शकुन्तलेति, सेयं याति शकुन्तला पतिगृहम्, अस्मान् साधु विचिन्त्य, शुश्रूषस्व गुरून्' अन्ते च 'अर्थो हि कन्या परकीय एव' इत्यादिभिः कण्वमुखेन प्रकटितस्य कुटुम्बिजनव्यवहारस्य अक्षरशोऽनुभववेद्यस्य निर्माता कवियंत्सत्यं कविकुलगुरुरेव। ईदृशीनां रसभावाविष्करणपटीयसीनां महाकविकृतीनामास्वादयितारो न केवलं भारतीयाः किन्तु परम्परातः संस्कृतवाङ्मये परिचयरहिताः पाश्चात्या अपि महता प्रयासेन संस्कृतभाषाज्ञानं कथञ्चित्सम्पाद्य

तावन्मात्रेणैव नाटकीयरसास्वादमनुभवन्ति । श्रूयते किल गटेनामा जर्मनदेशीयः पण्डितो नाटकमिदं वाचयित्वा हर्षनिर्भरं ननर्त इति । अपरे च पाश्चात्यपण्डिता एतन्नाटककर्तारं कालिदासं शेक्सपिअरसदृशमेव मन्यन्ते । वस्तुतस्तु नायं शेक्सिपअरसदृशः किन्तु स एव कालिदाससदृश इति वक्तुं युज्यते ।

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः)

काश्यपः —

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः ,
पीडयन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ १ ॥

सख्यौ — हला शकुन्तले , अवसितमण्डनासि । परिधत्स्व साम्प्रतं क्षौमयुगलम् । (शकुन्तला उत्थाय परिधत्ते)

गौतमी —जाते , एष त आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व ।

शकुन्तला —(सव्रीडम्) तात , वन्दे ।

काश्यपः —वत्से ,
ययातेरिव शार्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ २ ॥

गौतमी —भगवन् , वरः खल्वेषः , नाशीः ।

काश्यपः —वत्से , इतः सद्योहुताग्नीन् प्रदक्षिणीकुरुष्व ।

(शकुन्तला प्रदक्षिणं करोति)

प्रतिष्ठस्वेदानीम् । (सर्वे परिक्रामन्ति) भो भोः सन्निहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या ,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः ,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ३ ॥

शकुन्तला—(जनान्तिकम्) हला प्रियंवदे, आर्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

प्रियंवदा—न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते ।

उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥ ४ ॥

शकुन्तला—(स्मृत्वा) तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये ।

काश्यपः—अवैमि ते तस्यां सौहार्दम् । इयं तावत् दक्षिणेन ।

शकुन्तला - (लतामुपेत्य) वनज्योत्स्ने, चूतसंगतापि मां प्रत्यालिङ्गैताभिः शाखाबाहाभिः । अद्यप्रभृति दूरवर्तिनी ते खलु भविष्यामि । (सख्यौ प्रति) हला एषा द्वयोर्युवयोर्हस्ते निक्षेपः ।

सख्यौ—अयं जनः कस्य हस्ते समर्पितः ? । (बाष्पं विहरतः)

काश्यपः—अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला ।

शकुन्तला—तात , एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधू-

र्यदाऽनघप्रसवा भविष्यति, तदा मह्यं किमपि प्रिय-
निवेदयितृकं विसर्जयिष्यथ ।

काश्यपः—नेदं विस्मरिष्यामः ।

शकुन्तला —(गतिभङ्गं रूपयित्वा) को नु खल्वेष निवसने
मे सज्जते ? । (परावर्तते)

काश्यपः—वत्से ,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां ,
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति,
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ ५ ॥

शकुन्तला—वत्स, किं सहवासपरित्यागिनीं मामनुसरसि ?
अचिरप्रसूतया जनन्या विना विवर्धित एव । इदानीमपि
मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।
(रुदती प्रस्थिता)

शार्ङ्गरवः—भगवन् , ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति
श्रूयते । तदिदं सरस्तीरम् । अत्र सन्दिश्य प्रतिगन्तुमर्हसि ।

काश्यपः—तेन हि क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः)

काश्यपः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य
युक्तरूपमस्माभिः सन्देष्टव्यम् ? (चिन्तयति) शार्ङ्गरव,
इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयतु भवान् ।

काश्यपः—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः ,
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।

सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया ,
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ ६ ॥

शार्ङ्गरवः—गृहीतः सन्देशः ।

काश्यपः—वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य ,
शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने ,
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी ,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ७ ॥
कथं वा गौतमी मन्यते ?

गौतमी—एतावान् वधूजनस्योपदेशः । जाते , एतत् खलु सर्वमवधारय ।

शकुन्तला — तात , इत एव किं प्रियंवदानसूये सख्यौ निवर्तिष्येते ?

काश्यपः — वत्से , इमे अपि प्रदेये ? न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ?

काश्यपः — वत्से , किमेवं कातरासि ?
अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे ,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।

तनयमचिरात्प्राचीवार्कं प्रसूय च पावनम् ,
मम बिरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ ८ ॥

(शकुन्तला पितुः पादयोः पतति)

काश्यपः — यदिच्छामि ते तदस्तु ।

सख्यौ — सखि , यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्ततस्तस्येदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।

शकुन्तला—अनेन सन्देहेन वामाकम्पिताऽस्मि ।

सख्यौ — मा बिभीहि । अतिस्नेहः पापशङ्की ।

शकुन्तला — (आश्रमाभिमुखी स्थित्वा) तात , कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये ?

काश्यपः — श्रूयताम् —

भूत्वा चिराय चतुरन्तमहीसपत्नी ,
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं ,
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ ९ ॥

गौतमी — जाते , परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते । निवर्ततां भवान् ।

काश्यपः — वत्से , उपरुध्यते तपोनुष्ठानम् ।

शकुन्तला — तपश्चरणपीडितं तातशरीरम् । तन्मातिमात्रं मम कृत उत्कण्ठस्व ।

काश्यपः —

शममेष्यति मे शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारि विरूढं नीवारबलिं विलोकयतः ॥ १० ॥
गच्छ , शिवास्ते पन्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ — (शकुन्तलां विलोक्य) हा धिक् हा धिक्, अन्तर्हिता शकुन्तला वनराज्या ।

काश्यपः —(सनिःश्वासम्) अनसूये, गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे — तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

काश्यपः — स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः —

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं,
प्रत्यर्पितन्यास इवान्तरात्मा ॥ ११ ॥

(निष्क्रान्ताः सर्वे)

प्रश्नाः —

(१) सुताविरहकातरस्य काश्यपस्य शोको लोकानुभवसंवादी कथम्

(२) अस्मिन् परिच्छेदे कविना ग्रथितानि सुभाषितवाक्यानि संगृह्यन्ताम् ।

(३) वनज्योत्स्नाचूतवृत्तान्तस्य प्रकृते समञ्जसत्वं कथम् ?

(४) 'चराचरस्नेहवती शकुन्तला' इत्ययमर्थो युक्तिभिः समर्थनीयः ।

(५) स्पष्टीकुरुत — यदिच्छामि ते तदस्तु ।

(६) शकुन्तलायाः पतिगृहगमनप्रसङ्गेन तस्यैव काश्यपस्य शोकः समाधानं चेति विरुद्धमुभयं कथं संगच्छते ?

---

(२)

मानवकर्तव्यानि

परिचयः — वैदिकवाङ्मये उपनिषदो नाम सर्ववेदसाधारणो भागः तासु चोपनिषत्सु प्राय आध्यात्मिकतत्त्वानि प्रतिपादितानि भवन्ति। शङ्करभगवत्पादाचार्यैः कठोपनिषद्भाष्ये उपनिषच्छब्दस्य अविद्या (अज्ञान)-नाशकविद्या (ज्ञान) परत्वं मुख्यवृत्त्या गौण्या च तादृशविद्याप्रतिपादक-ग्रन्थपरत्वमवयवार्थनिर्देशपूर्वकं वर्णितम्। उपनिषत्कालस्तु सामान्यतः क्रिस्तजन्मनः पूर्वं सहस्राद्व्यादारभ्यैकसहस्रपर्यन्तं भवेदिति मतमैतिह्यविदाम्। भारतवर्षीयपुरातनकालीनवाङ्मयेषु प्रायशः सर्वत्रैव वेदानां सृष्ट्यादिकाले आविर्भूतत्वम् ऐकमत्येन प्रतिपादितं दृश्यते। सृष्ट्यादिकालीनत्वं क्रिस्त-पूर्वकालीनत्वं वा इत्येतस्य निर्णयार्थं नायमवसरः। कथमपि नाम भवतु, भारतीयानामध्यात्मविद्या आदर्शसंस्कृतिश्चातिपुरातनेऽपि काले कियतीं परां कोटिमधिरूढेति ज्ञायते औपनिषदूवाङ्मयपरामर्शात्।

अयं च परिच्छेदः कृष्णयजुर्वेदीयनारायणोपनिषदः समुद्धृतः। अस्यां चोपनिषदि अध्यात्मविद्यासम्बन्धिनो विविधा विषयास्तेषु तेषु मन्त्रेषु प्रतिपादिताः। तथैव सन्ध्यावन्दनादारभ्य संन्यासस्वीकारपर्यन्तं तत्त-द्धार्मिकविध्युपयोगिनोऽपि भूयांसो मन्त्राः समाम्नाताः। तत्रास्मिञ्जगतीतले गृहीतजन्मना मानवेन स्वकीयोत्कर्षसम्पादनाय परमं कर्तव्यं किमनु सरणीयम्? उत्कर्षस्य च कः परमोऽवधिः? इति प्रदर्शनाय प्रवृत्तो मन्त्रभाग इह समुद्धृतः। सत्यतपोदमशमादिप्रशंसया तेषामेव कर्तव्याना-मनुस्मरणीयत्वमन्ते च स्वस्वरूपात्मकानन्दावाप्तिः परमं ध्येयमिति स्फुट-मेवावगम्यते।

वैदिकवाङ्मये प्रमेयप्रतिपादनधोरणी बहुक्लिष्टा भवतीति प्रवादो भूय-सामर्वाचीनानाम्। अत एव वैदिकवाङ्मयाध्ययने बहवो जना विमुखी-

भवन्ति । तादृशैः सर्वैरपि महाशयैरेतस्य परिच्छेदस्याध्ययनमर्थानुसन्धानं च कृत्वैव स्वकीयं मतं निर्धारणीयम् । वेदमूलाधिष्ठितायाः पुरातनार्य संस्कृतेर्महिमा च साक्षादनुभवनीय इति सविनयमावेद्यते ।

प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार, किं भगवन्तः परमं वदन्तीति, तस्मै प्रोवाच सत्येन वायुरावाति, सत्येनादित्यो रोचते दिवि, सत्यं वाचः प्रतिष्ठा, सत्ये सर्वं प्रतिष्ठितं , तस्मात्सत्यं परमं वदन्ति । तपसा देवा देवतामग्र आयन् , तपस ऋषयः सुवरन्वविन्दन् , तपसा सपत्नान्प्रणुदा-मारातीस्तपसि सर्वं प्रतिष्ठितं , तस्मात्तपः परमं वदन्ति । दमेन दान्तः किल्बिषमवधून्वन्ति , दमेन ब्रह्मचारिणः सुवरगच्छन् , दमो भूतानां दुराधर्षं , दमे सर्वं प्रतिष्ठितं तस्मात् दमः परमं वदन्ति । शमेन शान्तः शिवमाचरन्ति , शमेन नाकं मुनयोऽन्वविन्दन् , शमो भूतानां दुराधर्षं , शमे सर्वं प्रतिष्ठितं , तस्मात् शमः परमं वदन्ति । दानं यज्ञानां वरूथं दक्षिणा , लोके दातारं सर्वभूतान्युपजीवन्ति , दानेनारातीरपानुदन्त , दानेन द्विषन्तो मित्रा भवन्ति , दाने सर्वं प्रतिष्ठितं , तस्मात् दानं परमं वदन्ति । धर्मो विश्वस्य जगतः प्रतिष्ठा , लोके धर्मिष्ठं प्रजा उपसर्पन्ति , धर्मेण पापमपनुदति , धर्मे सर्वं प्रतिष्ठितं , तस्मात् धर्मं परमं वदन्ति । यज्ञ इति यज्ञेन हि देवा दिवं गता , यज्ञेना-सुरानपानुदन्त, यज्ञेन द्विषन्तो मित्रा भवन्ति , यज्ञे सर्वं प्रति-ष्ठितम् , तस्मात् यज्ञं परमं वदन्ति । मानसं वै प्राजापत्यं पवित्रं , मानसेन मनसा साधु पश्यति , मानसा ऋषयः प्रजा असृजन्त , मानसे सर्वं प्रतिष्ठितं , तस्मान्मानसं परमं वदन्ति । य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभि-स्ताभिः पर्जन्यो वर्षति , पर्जन्येनौषधिवनस्पतयः प्रजायन्त , ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा

श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिः शान्त्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति, तस्मादन्नं ददन्त्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दः

प्रश्नः—

(१) अयं वैदिकमन्त्रसन्दर्भः केन कस्मै किमर्थं प्रोक्तः ?

(२) सत्यस्य दानस्य च कीदृशं माहात्म्यम् ?

(३) इह लोकस्य द्युलोकस्य च कः सम्बन्धः ?

(४) अन्नदानस्य श्रेष्ठत्वं सयुक्तिकं निरूपयत ।

---

(१३)

युद्धोद्यतः शिशुपालः

परिचयः—शिशुपालवधस्य नाम महाकाव्यस्य कर्तुर्महाकवेर्माघस्य विषये यद्वक्तव्यं तत् षष्ठपाठे उक्तम् । पञ्चदशसर्गादुद्धृतोऽयं परिच्छेदः । सन्दर्भस्तु—राजसूयप्रसङ्गे धर्मराजकृतां श्रीकृष्णस्याग्रपूजामसहमानेन चेदिपतिना शिशुपालेन क्रमेण धर्मस्य, भीष्मस्य, भगवतः श्रीकृष्णस्य च निर्भर्त्सना कृता । उपस्थितानन्यानपि भूपान् दारुणैर्वचनैरवमत्य सभास्थानात् बहिर्निर्गत्य शिबिरं च प्रविश्य युद्धदुर्मदो बभूव इति ।

अस्मिन् सन्दर्भे युधिष्ठिरनिर्भर्त्सनायां धर्मराजसंज्ञायाः मङ्गलसंज्ञा-तुल्यता, भीष्मनिर्भर्त्सनाकाले च 'स्फुटं भवसि निम्नगासुतः' इति, श्रीकृष्णनिन्दाकाले च 'दण्डदलितसरघः – मधुसूदन – इत्यादयो वर्णना-प्रकारा अतीव प्रमोदावहा वर्तन्ते। एवं 'सुजनं जनाश्चलयितुं क ईशते' इत्यादिभिरर्थान्तरन्यासैः कविर्माघः 'माघे सन्ति त्रयो गुणाः' इति स्व-कीयां प्रख्यातिं सार्थकीकरोति।

अथ तत्र पाण्डुतनयेन सदसि विहितं मुरद्विषः।
मानमहसत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ॥१॥
ध्वनयन्सभामथ सनीरघनरवगभीरवागभीः।
वाचमवददतिरोषवशादतिनिष्ठुरस्फुटतरामसौ ॥२॥

धर्मं प्रति—

यदपूपुजस्त्वमिह पार्थ मुरजितमपूजितं सताम्।
प्रेम विलसति महत्तदहो दयितं जनः खलु गुणीति मन्यते ॥३॥
अनृतां गिरं न गदसीति जगति पटहैर्विघुष्यसे।
निन्द्यमथ च हरिमर्चयतस्तव कर्मणैव विकसत्यसत्यता ॥४॥
तव धर्मराज इति नाम कथमिदमपेष्ठु पठ्यते।
भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ॥५॥
यदि वार्चनीयतम एष किमपि भवतां पृथासुताः।
शौरिरवनिपतिभिर्निखिलैरवमाननार्थमिह किं निमन्त्रितैः ॥६॥

भीष्मं प्रति—

स्वयमेव शन्तनुतनूज यमपि गणमर्घ्यमभ्यधाः।
तत्र मुररिपुरयं कतमो यमनिन्द्यबन्दिवदभिष्टुषे वृथा ॥७॥
अवनीभृतां त्वमपहाय गणमतिजडः समुन्नतम्।
नीचि नियतमिह यच्चपलो निरतः स्फुटं भवसि निम्नगासुतः ॥८॥

कृष्णं प्रति—

प्रतिपत्तुमङ्ग घटते च न तव नृपयोग्यमर्हणम ।
कृष्ण कलय ननु कोऽहमिति स्फुटमापदां पदमनात्मवेदिता॥९॥
असुरस्त्वया न्यवधि कोऽपि मधुरिति कथं प्रतीयते ।
दण्डदलितसरघः प्रथसे मधुसूदनस्त्वमिति सूदयन्मधु ॥१०॥
जगति श्रिया विरहितोऽपि यदुदधिसुतामुपायथाः ।
ज्ञातिजनजनितनामपदां त्वमतः श्रियः पतिरिति प्रथामगाः॥११
त्वयि पूजनं जगति जाल्म कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरां शिरसीव कङ्कतमपेतमूर्धजे ॥१२॥

राज्ञः प्रति—

मृगविद्विषामिव यदित्थमजनि मिथतां पृथासुतैः ।
अस्य वनशुन इवापचितिः परिभाव एव भवतां सुवोऽधिपाः ॥१३
अयमुग्रसेनतनयस्य नृपशुरपरः पशूनवन् ।
स्वामिवधमसुकरं पुरुषैः कुरुते स्म यत्परममेतदद्भुतन ॥१४॥
इति वाचमुद्धतमुदीर्य सपदि सह वेणुदारिणा ।
सोढरिपुबलभरोऽसहनः स जहास दत्तकरतालमुच्चकैः ॥१५॥
कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः ।
सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते ॥१६॥
विहितागसो मुहुरलङ्घ्यनिजवचनदामसंयतः ।
तस्य कतिथ इति तत्प्रथमं मनसा समाख्यदपराधमच्युतः ॥१७॥
अथ गौरवेण परिवादमपरिगणयंस्तमात्मनः ।
प्राह मुरारिपुतिरस्करणक्षुभितः स वाचमिति जाह्नवीसुतः॥१८॥
विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनम् ।
यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृताम् ॥१९॥
इति भीष्मभाषितवचोऽर्थमधिगतबलामिव क्षणात् ।
क्षोभमगमदतिमात्रमथो शिशुपालपक्षपृथिवीभृतां गणः ॥२०॥

रभसादुदस्थुरथ युद्धमनुचितभियोभिलाषुकाः ।
सान्द्रमुकुटकिरणोच्छलितस्फटिकांशवः सदसि मेदिनीभृतः ॥२१
हरिमप्यमंसत तृणाय कुरुपतिमजीगणन्न वा ।
मानतुलितभुवनत्रितयाः सरितः सुतादबिभयुर्न भूभृतः ॥२२॥
गुरु निःश्वसन्नथ विलोलसदवधुवपुर्वचोविषम् ।
कीर्णदशनकिरणाग्निकणः फणवानिवैष विससर्ज चेदिपः ॥२३
विदतुर्यमुत्तममशेषपरिषदि नदीजधर्मजौ ।
यातु निकषमधियुद्धमसौ वचनेन किं भवतु साध्वसाधु वा ॥२४
अभिधाय रूक्षमिति मा स्म गम इति पृथासुतेरिताम् ।
वाचमनुनयपरां स ततः सहसावकर्ण्य निरियाय संसदः ॥२५
क्षणमीक्षितः पथि जनेन किमिदमिति जल्पतो मिथः ।
प्राप्य शिबिरमविशङ्कमनाः समनीहनद् द्रुतमनीकिनी मसौ ॥२६

प्रश्नाः—

(१) स्पष्टीकुरुत – 'परवृद्धिमत्सरि मनो हि मानिनाम्, स्फुटमापदां पदमनात्मवेदिता, वचनेन किं भवतु साध्वसाधु वा'।

(२) शिशुपालेन कृतो भीष्मस्योपालम्भः स्वशब्दैर्वर्णनीयः ।

(३) कोपाविष्टस्य शिशुपालस्य हासः कथम् ?

(४) चेदिपतेः सर्पोपमानेन किं सूच्यते ?

---

(१४)

प्रदीप्तकोपं भीमं धर्मराजः सान्त्वयति

परिचयः — तृतीयपाठवत् । किरातार्जुनीयस्य द्वितीयसर्गादुद्धृतोऽयं प्रसङ्गः । अस्मिन् प्रसङ्गे उपक्रमे भीमेन द्रौपदीमतपरिपोषः 'अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्' इति प्रशंसापूर्वकं कृतः । तदीयभाषणे 'मानिनः सुखमुज्झन्ति न धाम, त्वदनुत्साहहता विपत्तयो विद्विषाम्' इत्यादीनि अमर्षसूचकानि वाक्यानि युधिष्ठिरस्य मन्यूद्दीपकानि सन्ति । तानि श्रुत्वापि अजातशत्रुः शान्तचेता युधिष्ठिरो भीमस्य विकार-परवशतामपनेतुं 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्, असुरक्ष्या हि बहुच्छलाः श्रियः' इत्यादिभिर्वाक्यैः सहिष्णुतामेवोपदिशति । सोऽयं सन्दर्भो भारतीयराजनीतेः सुदूरदर्शितां जनानुरागमूलतां च प्रकटयन् महाकविना भारविणा गभीरैः शब्दार्थैः प्रदर्शितः । अत एव वदन्ति अभियुक्ताः —'भारवेरर्थगौरवम्' इति ।

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥१॥
यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥२॥
विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥३॥
इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥४॥
चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥५॥

विधुरं किमतः परं परैरवगीतां गमिते दृशामिमाम् ।
अवसीदति यत्सुरैरपि त्वयि सम्भावितवृत्ति पौरुषम् ॥६॥
द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥७॥
विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥८॥
तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥९॥
मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयंहतैः ।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥१०॥
ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥११॥
किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥१२॥
कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥१३॥

अथ धर्मराजः भीमं वदति—

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥१४॥
उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥१५॥
अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥१६॥
सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥१७॥

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥१८॥
समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥१९॥
क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाञ्चलेन्द्रियैरसुरक्ष्या हि बहुच्छलाः श्रियः ॥२०॥
श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥२१॥
मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥२२॥
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥२३॥

प्रश्नाः —(१) स्पष्टीक्रियताम् —

(१) गुणगृह्या वचने विपश्चितः ।
(२) न महानिच्छति भूतिमन्यतः ।

(२) पराक्रमहीनस्य भूपतेः अपकर्षः केन क्रमेण भवति ?

(३) तीक्ष्णत्वमार्दवयोः काले प्रयुक्तयोः फलं कीदृशम् ?

(४) शुचिनः श्रुतस्य राजनीतौ क उपयोगः ?

(५) मदमानसमुद्धतो नृपः कथं ऱ्हसति ?

---

(१५)

यज्ञाधिकारविचारः

परिचयः —षण्णां दर्शनानां मध्ये साक्षात् वेदार्थविचारात्मके द्वे एव दर्शने – पूर्वमीमांसा उत्तरमीमांसा चेति । तत्र पूर्वमीमांसायां कर्मकाण्डविचारः, उत्तरमीमांसायां च उपासनाकाण्डस्य ज्ञानकाण्डस्य चेति व्यवस्थितिः । पूर्वमीमांसादर्शनस्य आद्यः प्रवर्तको भगवान् जैमिनिः षोडशाध्यायात्मकं सूत्रग्रन्थं प्राणैषीत् । तस्य च भाष्यं शबराचार्येण रचितं प्रसिद्धमस्ति । असौ च शबराचार्यः क्रिस्ताब्दस्य चतुर्थशतके बभूवेति ऐतिहासिकाः कथयन्ति । अयं च जन्मना आदित्यसेननामकोऽपि जैनभयेन नगरात् पलायितः शबररूपेण वने प्रच्छन्नं वसति स्म । तस्मिन्नेव च काले तत्रत्येषु तरुपत्रेषु मीमांसाभाष्यं लिखितवान् इत्यैतिह्यम् । अस्मिन् भाष्ये षष्ठाध्याये यज्ञाधिकारविचारः प्राधान्येन कृतः । तत्र विधायकवचनेषु स्वर्गकामः, पुत्रकामः, पशुकामः यजेतेति अविशेषश्रवणेन स्थावरतिर्यगादिसाधारण्येन सर्वमनुष्याणां यज्ञकर्मण्यधिकारो वर्तत इति पूर्वपक्षमुद्भाव्य साङ्गयज्ञकर्मानुष्ठातुं ये समर्था मानवास्तेषामेवाधिकारः, न तिर्यगादिसाधारण्येन, नापि देवानां, ऋषीणां वा, इति सिद्धान्तः समर्थितः ।

प्राचीनानां भाष्यकाराणां भाष्यलेखनसरणिः अन्यादृशी भवति यादृशी भाषा प्रश्नप्रतिवक्त्रोः सम्भवति तादृशीमेव व्यावहारिकीं भाषामाश्रित्य ते भाष्यं लिखन्ति । तद्वाचनेन पुरातनकालीनोऽपि पूर्वोत्तरपक्षसम्प्रदायः सद्यः प्रचलन्निव प्रतिभासमानो वाचकानां चेतश्चमत्करोति । तत्रापि लघुभिर्वाक्यैः प्रमेयं प्रतिपाद्यते । यथा — 'किं प्राप्तम् ? सर्वाधिकारः, अविशेषात् ' इत्येवमादि । एवं सत्यपि, पूर्वोत्तरसन्दर्भज्ञानेन स्वरविशेषसहकारेण भाष्ये वाचिते सत्येवार्थप्रतीतिर्भवेत्, नान्यथा इति

सम्यगवधातव्यम् । जटिलस्यापि शास्त्रार्थस्यातिसुलभभाषया निरूपणे भाष्यकाराणां चातुर्यमसाधारणमनुभवैकवेद्यं च भवति ।

' फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात् ' (पूर्वपक्षसूत्रम्)

इदमामनन्ति—' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' ' ज्योतिष्टोमेन स्वर्गकामो यजेत ' इत्येवमादि । तत्र सन्देहः । किं यावत् किञ्चित् सत्त्वं, तत्सर्वमधिकृत्य एतदुच्यते, उत समर्थमधिकृत्येति । किं प्राप्तम् ? सर्वाधिकारः । अविशेषात् । ननु वृक्षादयो न किञ्चित् कामयन्ते, कथं तेषामधिकारः स्यात् ? उच्यते—मा भूदचेतनानाम् । तिरश्चस्त्वधिकृत्य यजेतेति ब्रूयात् । ननु तिर्यञ्चोऽपि न किञ्चित् कामयन्ते । नेति ब्रूमः । कामयन्ते सुखम् । एवं हि दृश्यते — घर्मोपतप्ताश्छायामुपसर्पन्ति ; शीतेन पीडिता आतपम् । आह—ननु तिर्यञ्च आसन्नं फलं चेतयन्ते, न कालान्तरफलं प्रार्थयन्ते । कालान्तरफलानि च वैदिकानि कर्माणि । उच्यते-कालान्तरेऽपि फलं कामयमाना लक्ष्यन्ते । शुनश्चतुर्दश्यामुपवसतः पश्यामः, श्येनांश्चाष्टम्याम् । न चैषां व्याध्याशङ्का । नियतनिमित्तत्वात् । नानाहाराणामपि तस्मिन् काले दर्शनात् । समानाहाराणामपि अन्यस्मिन् कालेऽदर्शनात् । लिङ्गानि च वेदे भवन्ति—' देवा वै सत्रमासत ' इत्येवमादीनि देवतानामृषीणां वनस्पतीनामधिकारं दर्शयन्ति । द्रव्यपरिग्रहोऽपि देवग्रामः, हस्तिग्रामः, ऋषभग्रामः इत्युपचारादस्त्येव इति । तस्मादमनुष्याणामपि शक्नुवतामधिकार इति ।

' कर्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते ' (सिद्धान्तसूत्रम्)

वाशब्दः पक्षं व्यावर्तयति । न चैतदस्ति तिर्यगादीनामप्यधिकार इति । कस्य तर्हि ? यः समर्थः कृत्स्नं कर्माभिनिर्वर्तयितुम् ।

न चैते शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्तयितुम्। तस्मादेषां न सुखस्याभ्युपायः कर्म इति। कथं यो न शक्यते कर्तुं, सोऽभ्युपायः स्यादिति ? न देवानाम्। देवतान्तराभावात्। न हि आत्मानमुद्दिश्य त्यागः सम्भवति। त्याग एवासौ न स्यात्। न ऋषीणाम्। आर्षेयाभावात्। न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति। न चैषां सामर्थ्यं प्रत्यक्षम्। अथैतदेव वाक्यं समर्थानां सगुणं कर्म विधास्यति, असमर्थानां विगुणमिति। तन्न। सकृदुच्चारणे उभयशक्तिविरोधात् वाक्यं भिद्येत। साकांक्षं हि तदितिकर्तव्यतां प्रति। तस्मात्साङ्गयागोपदेशः स इति निरङ्ग-यागोपदेशाभावः। तस्मान्मनुष्याणामेवाधिकार इति।

प्रश्नाः —

(१) स्थावराणां तिर्यगादीनां च वैदिककर्मस्वधिकारोऽस्तीति पक्षे का युक्तिः ?

(२) कस्मिंश्चिद्विषये वादिप्रतिवादिभावेन शास्त्रेषु पूर्वोत्तरपक्षयोरुप-न्यासो लौकिकव्यवहारे कथमुपयोगकारी ?

(३) देवानामृषीणां च कर्माधिकारः कुतो नास्ति ?

---

(१६)

रघुराजस्य पराक्रमो राजनीतिश्च

परिचयः —कविकुलगुरुः कालिदासः कालीदेवतायां निस्सीमभक्तिमान् तस्याः प्रसादेन एव स महाकविर्बभूव इति तदीयं नामैव सूचयति। अयं कविः क्रिस्ताब्दस्य चतुर्थशतके सञ्जात इत्यैतिह्यविदो वदन्ति। तथा च बङ्गीयाः काश्मीरदेशीयाः विदर्भदेशीयाश्चेति नानादेशस्थिता जनाः एनं स्वस्वदेशोद्भवं साभिमानं कथयन्ति। अयमेक एव विषयोऽस्य कवेर्माहात्म्यं सूचयति। तत्कालप्रसिद्धभोजराजसभायां स्थितेषु नवसु कविमूर्धन्यरत्नेषु अयं कविरग्रेसरत्वं प्राप्त आसीदिति सुप्रसिद्धम्। एतत्कृता ग्रन्थाः रघुवंशादीनि काव्यानि, शाकुन्तलादीनि च नाटकानि न केवलं भारतीयानां किन्तु पाश्चात्यानामपि श्लाघास्पदं वर्तन्ते।

तत्र रघुवंशकाव्यात् तृतीयसर्गाद् उद्धृतोऽयं भागः। अस्मिन् भागे कथितः कथासन्दर्भः संक्षेपादित्थम् — दिलीपः स्वसूनुं युवराजं रघुं होमतुरङ्गरक्षणे न्ययुङ्क्त। दिलीपः स्वपदमपहरेदिति शङ्कितः शतक्रतुः तस्याश्च मेधतुरगमपजहार। तदा तद्रक्षणे नियुक्तेन रघुणा स्वपराक्रमः प्रकटितः इन्द्रं च प्रसाद्याभीप्सितं फलं सम्पादितमिति।

अस्मिन् प्रसङ्गे इन्द्रेण सह रघोः संभाषणकाले प्रकटीभूताः अमूल्या गुणाः सर्वैः संग्राह्या भवन्ति। तत्र ' पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम्, न खल्वनिर्जित्य रघुं कृती भवान्, पदं हि सर्वत्र गुणैर्निधीयते ' इत्यादिभिर्वाक्यैः रघोः स्वाभिमानसाहसधैर्यवाग्मित्वादयो गुणा वाचकैः अवश्यं मनसि निधेया अनुकरणीयाश्च।

ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥१॥
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥२॥
नियुज्य तं होमतुरङ्गरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥३॥
ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥४॥
स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥५॥
शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥६॥
मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥७॥
त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥८॥
तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसास्मादृदते न पद्धतिम् ॥९॥
इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् ।
निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥१०॥
यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥११॥
हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥१२॥

अतोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य सन्ततेः ॥१३॥
ततः प्रहस्यापभयः पुरन्दरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥१४
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥१५॥
रघोरवष्टम्भमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ॥१६॥
दिलीपसूनोः स बृहद् भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥१७॥
तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥१८॥
अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥१९॥
ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम ।
रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद्विडौजसः ॥२०
स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥२१॥
रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः ।
निमेषमात्रादवधूय तां व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ॥२२॥
तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥२३॥
असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्फुटमाह वासवः ॥२४॥
ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताञ्जलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ॥२५॥

अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ॥२६
तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ।
नृपस्य नातिप्रमनाः सदोगृह सुदक्षिणासूनुरपि न्यवर्तत ॥२७॥
इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ॥२८॥
अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे ,
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये ,
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥२९॥

प्रश्नाः —

(१) उपमानोपमेयभावः स्पष्टीकर्तव्यः —
विभावसुः सारथिनेव वायुना ..... इत्यादि ।

(२) रघुणा कृतमिन्द्रमहत्त्वस्य सोपालम्भवर्णनं कुरुत ।

(३) रघुवासवयोः संवादं स्वीयैर्वाक्यैर्लिखत ।

(४) इक्ष्वाकूणां कुलव्रतं किम् ?

(१७)

रामस्य वनगमनम्

परिचयः — कविकुलोपजीव्यो वदान्यो भोजराजः कालिदाससमकालीन इति श्रूयते । स चम्पूरामायणं नाम काव्यं रचयामास । 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते इति लक्षणेनैव चम्पूशब्दार्थो ज्ञायते । इदं काव्यं वस्तुतः कालिदासेन विरचितमपि भोजराजनाम्ना प्रकटीकृतमिति केचित् वदन्ति । यः कोऽपि वा भवतु कर्ताऽस्य ग्रन्थस्य, किन्तु अर्थगाम्भीर्यप्रसादगुणशालित्वोदात्तरचनादिविषयेषु सर्वेष्वेतत्काव्यं सहृदयानन्दकरं वर्तते । तत्रायोध्याकाण्डस्थोऽयं भागः ।

दशरथप्रतिश्रुतं वरद्वयं याचमाना कैकेयी रामवनवासस्य कारणं बभूवेति शोकाकुलो दशरथोऽन्तकातिथिर्जातः । भरतस्तु सर्वमेतं वृत्तान्तं विदित्वा मातरं निर्भर्त्स्य रामं वनवासात् निवर्तयितुं प्रयतते । किन्तु श्रीरामः तं सान्त्वयित्वा पितुराज्ञापालनपरो वनं व्रजत्येव ।

अस्मिन् प्रसङ्गे वार्धक्ये स्थितेन दशरथेन पुत्रवियोगमसहमानेन प्रार्थिताऽपि कैकेयी स्वकीयं हठं न मुमोच । सत्यसन्धाः पूर्वतना राजानः प्रतिज्ञापालनार्थं प्राणानपि त्यक्तुं समर्थाः किं पुनः सुतदारराजवैभवादिकम् ? इति अत्रत्यो दशरथवृत्तान्त एव सूचयति । तथा च रामोऽपि पूर्वस्मिन्नेव दिने यौवराज्याभिषेकवृत्तान्तं परदिने च स्ववनवासप्रसङ्गं श्रुत्वाऽप्यविचलितमानसः पितृवचनपालनार्थं वनं जगाम । प्रमदा दुरभिनिवेशग्रस्ता विषप्राशनेनात्मघातपर्यन्तमपि प्रवर्तन्ते इति कैकेयीवृत्तान्ततो ज्ञायते ।

ततः कैकेयी किमकरोदित्याशङ्कायामाह —

सैषा मन्थराभिधानपिशाचिकावेशपरवशनिजाशया पूर्वं दण्डके वैजयन्तपुरवास्तव्यशम्बरासुरसंगतवेदनापनोदनार्थमात्मने वितीर्णं वराय दशरथाय वरद्वयं न्यवेशयत् ।

तयोरेकस्य संरम्भो भरतस्याभिषेचनम् ।
अन्यस्य वन्यवृत्त्यैव वने रामस्य वर्तनम् । १॥

तनयविरहवार्तामात्रसन्तप्यमाना —

अथ दशरथचित्ताच्चेतना निर्जगाम ।
दवहुतवहरोचिर्ज्वालया लेह्यमाना ,
झटिति गहनगुल्मादुज्जिहाना मृगीव ॥२॥

अथ दशरथः कथमपि लब्धसंज्ञः कैकेयीमभाषत —

रामः काममुपाश्रयिष्यति वनं त्यक्त्वा धृतं कौतुकम् ,
लोकस्त्यक्ष्यति कौतुकं चिरधृतं तस्याभिषेके कथम् ? ।
धर्मापायभयेन वत्सविरहं वक्ष्यामि वक्ष्यामि किम् ,
यावत्कलमकीर्तिरार्तिजननी जायेत जाये तव ॥३॥

वत्सं कठोरहृदये नयनाभिरामं ,
रामं विना न खलु तिष्ठति जीवितं मे ।
धातुर्बलादुपयमस्त्वयि जातपूर्वः ,
कैकेयि मामुपयमं नयतीति मन्ये ॥४॥

तदनु निजमनोरथैकपरिपूरणे कृतादरा कैकेयी सोपहासमवादीत् —

सत्यविप्लवमपत्यसङ्गतः संगतं भृशमपश्यतस्तव ,
आश्रुतस्य विफलत्वमस्ति चेदाः श्रुतस्य रचितोऽयमञ्जलिः ॥५॥
किं नागतम्ते श्रवसोः सकाशमरिन्दमः सत्यगिरां पुरोगः ।
श्येनामिषीभूतकपोतपोतजीवातवे शस्त्रनिकृत्तगात्रः ॥६॥

असुरसमरवेलाजातबाधावसाने ,
वरयुगमदिशस्त्वं प्रीतिपूर्वं यया मे ।

अशिथिलगुणबन्धाः सत्यसन्धा नरेन्द्रा
जललिपिरिति कामं संगिरन्तां गिरं ताम् ॥७॥
सत्योक्तां गिरमिह निर्वहस्व मा वा ,
सम्मानं भुवि न सहेय राममातुः ।
संस्थास्ये विषमुपभुज्य पश्यतस्ते ,
संनाह्यं त्यजसि न चेत्प्रवर्तमानम् ॥८॥

एवंवादिनीमेनां भूयोऽपि भूपतिरवदत्— अयि कठिनहृदये ,
किमुन्मुक्तलोकमर्यादया दयापेतया त्वयोत ।
नैवाभवस्त्वमिह शीलवतीषु गण्या,
नैवाभजत्पितृमतां गणनां स रामः ।
नैवापमात्मजसुखान्यहमप्यनार्ये ,
नैवापमम्बु भरतेन न मे प्रदेयम् ॥९॥
वासस्त्वच्चां भवतु किंचन तारवीणां ,
छायाद्रुमाश्च भवनानि भवन्तु धन्याः ।
कैकेयि तस्य शयनानि कथं भवेयुः ,
त्वच्चेतसोऽपि कठिनानि शिलातलानि ॥१०॥
एवं भर्त्रा भर्त्सिताऽप्यार्द्रचित्ता ,
नाभूदेषा मन्थराक्रान्तवृत्तिः ।
राकाचन्द्रे राजमानेऽप्यबाधं ,
वीरुच्छन्ना चन्द्रकान्तस्थलीव ॥११॥

तदनु मुहूर्तमपि राममुखावलोकनसुखमनुबुभूषुर्दशरथः कुमार-मानयेति सुमन्त्रमादिदेश । तेन सत्वरं राजभवनं प्रवेशितो रामः कृतप्रणामः पितरमयथातथभूतमुखविकासमारादालक्ष्य चकितः किमिदमिति कैकेयीमन्वयुङ्क्त । साऽपि पापाशया प्रत्यवादीत्—

'वत्स प्रतिश्रुतवरद्वयनिर्वहणे निपुणेतरस्तातस्ते सम्प्रति सानुशयस्तनयवात्सल्यात् सत्यव्यत्यासत्रासाच्च गाढमगाधे शोक-

सागरे निमज्जतीति । वरद्वयं तावत् तव मुनिवृत्त्यैव वने वर्तन-
मवनेरवनं भरतस्येति' ।

रामस्तदाकर्ण्य प्रमुदितहृदयः कृताञ्जलिरेनां प्रति व्यजिज्ञपत् —

भीतो भूभरतः किमम्ब भरतः किं वा वनात्पावनात् ,
त्रस्तोऽहं सगरान्ववायककुदस्तातः कुतः शोचति ।
दिव्यायाः सरितो निवापकरणादल्पां प्रतिज्ञामिमाम् ,
आवाभ्यामभिपूरयिष्यति न चेत्पुत्री कथं स्यादयम् ॥१२॥

वनभुवि तनुमात्रत्राणमाज्ञापितं मे ,
सकलभुवनभारः स्थापितो वत्समूर्ध्नि ।
तदिह सुकरतायामावयोस्तर्कितायां ,
मयि पतति गरीयानम्ब ते पक्षपातः ॥१३॥

तातः स्ववाचा व्यवहृत्य हृद्यं वत्साभिषेकोत्सवमङ्गलं मे ।
प्रणामसंज्ञस्य मयार्पितस्य किं पूर्णपात्रस्य न पात्रमासीत् ॥१४॥

तत्क्षणमशनिहत इव पर्वतः सर्वतः परीतदवदहन इव वनस्पति-
र्दिवस्पतिपदभ्रंशविधुर इव नहुषः पपात निःसंज्ञः पङ्क्तिरथः ।
ततः सा पितृनिदेशमाचरेति राममादिदेश । स एषः —

मातुराज्ञां वहन्मूर्ध्ना मालामिव महायशाः ।
वनाय रामो वव्राज जगतामवनाय च ॥१५॥

प्रश्नाः —

(१) रामे पुत्राधिकवात्सल्यवती कैकेयी वरप्रार्थानावसरे कथं तद्वनवासं याचते ?

(२) सत्यसन्धोऽपि दशरथः कैकेयीप्रार्थितवरदाने कुतो विचलितमना भवति ?

(३) राममातुः सन्मानमसहमाना कैकेयी कथमाक्रोशति कथं च प्रकटयति मानसीं क्षुद्रताम् ?

(४) भरतस्य राज्यलाभः , स्वस्य च वनवास इति श्रुत्वापि रामस्य मनसः का स्थितिः ?

(५) कैकेय्याः कस्मिन् पक्षपातः ? रामे वा भरते वा ?

---

(१८)

हंसदूतः

परिचयः — श्रीहर्षनामा कविर्नलराजचरितप्रतिपादकं नैषधीयचरितं नाम काव्यं रचितवान् । इदं च काव्यं भारते प्रसिद्धेषु पञ्चमहाकाव्येषु अन्तर्भूतं गुणालंकाररसभावादिविषये परोत्कर्षमधिरूढं विद्वत्प्रियं च वर्तते । अत एवाभियुक्ता वदन्ति ' नैषधं विद्वदौषधम् ' इति । अयं च कविः क्रिस्ताब्दस्य द्वादशशतकस्योत्तरार्धे समजातः, ' श्रीहीर-मामल्लदेवी-तनयः ' इति तदीयकाव्यस्य प्रतिसर्गान्तपद्यादवधार्यते । चिन्तामणिमन्त्रोपासनालब्धतीव्रतरबुद्धिवैभव एव कविः प्रतिभासामर्थ्यविषये स्वकीयं गुरुमप्यतिशयान आसीदिति गुरुशिष्यसंवादात् ज्ञायते । जातुचित् गुरुः एतस्य बुद्धिपरीक्षायै , ' श्रीहर्ष, किं करोषि ' ? इति षकारद्वयगर्भितं प्रश्नं चकार, श्रीहर्षस्तु तदुत्तरम् — ' अशेषशेमुषीमुषमाषभक्षं भक्षयामीति षकारषट्कोपेतं बभाषे । अनेन एव कविना रचितानि विजय-प्रशस्तिरित्यादीनि काव्यानि तथाच अस्य खण्डनखण्डखाद्यं नाम दार्शनिको ग्रन्थश्च नितरां प्रसिद्धः ।

अत्रत्यः परिच्छेदो नैषधचरितस्य प्रथमद्वितीयतृतीयसर्गेभ्यः कांश्चित् श्लोकान् उद्धृत्य संग्रथितः । अत्रैवं कथासन्दर्भः — एकदा क्रीडोद्याने विहारपरो नलभूपालः सौवर्णपक्षयुतं देवहंसं ददर्श कुतूहलेन च तं जग्राह । पश्चात् हंसेन साधिक्षेपं सदैन्य च याचितः तं मुमोच । आत्मनो विमोचनेन तुष्टान्तरङ्गो हंसः कृतस्य प्रत्युपकारार्थं राजानं दमयन्तीं प्रापयितुकामः तां तथाऽवर्णयत् यथा प्रत्यक्षदर्शनाभावेऽपि नलस्तस्यामनुरराज्ज । अथ च नलेनानुमतो हंसः विदर्भदेशे दमयन्तीसंनिधिमासाद्य नलभूपालवर्णनेन तस्या अपि नलानुरागं जनयित्वा स्वदौत्यं सफलीचकारेति ।

अत्र सन्दर्भे 'अहो विधे त्वां करुणा रुणद्धि नो ; ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ; अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ; पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस' इत्यादिभिः करुणरसपरिपोषः, लोकव्यवहारः, अर्थान्तरन्यासोऽनुभवसंवादि-दृष्टान्तोल्लेखनं चेत्येवमादयो गुणाः सुतरां वाचकहृदयमावर्जयन्ति ।

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ॥१
अथावलम्ब्य क्षणमेकपादिकां तदा निद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकंधरः शिरः पिधाय पक्षेण रतिक्लमालसः ॥२॥
विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम् ।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥३॥
तदात्तमात्मानमवेत्य संभ्रमात् पुनः पुनः प्रायसदुत्पुवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ॥४॥

हंसो राजानं ब्रूते—

धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान् मम हेमजन्मनः ।
तवार्णवस्येव तुषारसीकरैः भवेदमीभिः कमलोदयः कियान् ॥५॥
पदे पदे सन्ति भटा रणोद्भटाः न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥६॥
फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी घृणीयते ॥७
मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्विरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन् अहो विधे त्वां करुणा रुणद्धि नो ॥८॥
इत्थममुं विलपन्तममुञ्चत् दीनदयालुतयाऽवनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥९॥

अथ हंसो भाषते —

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥१०॥
स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥११॥

तस्य पुत्री —

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां ययौ ॥१२॥
अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥१३॥
तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवान् अपि नेन्द्रेण यथापनीयते ॥१४॥
तव संमतिमेव केवलामधिगन्तुं धिगिदं निवेदितम् ।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ॥१५॥

अथ दमयन्त्यामनुरक्तो नलो ब्रवीति —

शतशः श्रुतिमार्गतैव सा त्रिजगन्मोहमहौषधिर्मम ।
अनुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ॥१६॥
तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः ।
अयि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ॥१७॥
अथ भीमसुतावलोकनैः सफलं कर्तुमहस्तदेव सः ।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥१८॥
अथ भीमसुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥१९॥

अथ कनकपतत्रस्तत्र तां राजपुत्रीं ,
सदसि सदृशभासां विस्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥२०॥
आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसावतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥२१॥
आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः संभ्रान्तमन्तःकरणं चकार ॥२२॥

दमयन्तीनिकटे हंसो नलं स्तौति—

यदि त्रिलोकी गणनापरा स्यात् तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्धं गणितं यदि स्यात् गणेयनिःशेषगुणोऽपि स स्यात् ॥२३
निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥२४॥
अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा ।
जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरीः स्यात् ॥२५॥
आस्तां तदस्तुतचिन्तयालं मयासि तन्वि श्रमितातिवेलम् ।
सोऽहं तदाधिः परिमार्ष्टुकामः किमीप्सितं ते विदधेऽभिधेहि ॥२६॥

इतीरिता पत्ररथेन तेन च्हीणा च हृष्टा च बभाण भैमी ।
चेतो नलं कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥२७॥

हंसः —' यद्येवं तर्हि तव कृतेऽहं नलं याचेय । किन्तु —
पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे ।
त्वदर्थमर्थित्वकृतिप्रतीतिः कीदृङ् मयि स्यान्निषधेश्वरस्य ॥२८॥

दमयन्ती —यदि ,

अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥२९॥
श्रुतः स दृष्टश्च हरित्सु मोहात् ध्यातश्च नीरन्ध्रितबुद्धिधारम् ।
ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेकशेषः ॥३०॥
अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥३१॥
शुद्धान्तसम्भोगनितान्ततुष्टे न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ॥३२॥
त्वया निधेया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस ॥३३॥
विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयास्मिन्समयं समीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः कार्यस्य काऽऽर्यस्य शुभा
विभाति ॥३४॥

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् ।
अमोचि चञ्चूपुटमौनमुद्रा विहायसा तेन विहस्य भूयः ॥३५॥
धन्याऽसि वैदर्भि गुणैरुदारैः यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकायाः यदब्धिमप्युत्तरलीकरोति ॥३६॥
नलेन भायाः शशिना निशेव त्वया स भायान्निशया शशीव ।
पुनः पुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ॥३७॥

इत्यालपत्यथ पतत्रिणि तत्र भैमी ,
सख्यश्चिरात्तदनुसन्धिपराः पर्यायुः ।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य ,
वेगाज्जगाम निषधाधिपराजधानीम् ॥३८॥

प्रश्नाः

(१) हंसकृतो नलस्योपालम्भः स्ववाक्यैर्लिख्यताम ।

(२) नलदमयन्त्योः संघटने हंसस्य क उद्देशः ?

(३) ' निशा शशाङ्कं शिवया गिरीशम् , नलेन भायाः शशिना निशेव ' इतिपद्यद्वये कथितमुपमानोपमेयभावं स्फुटीकुरुत ।

(४) दमयन्त्या नलविषये स्वानुरागनिर्भरः तद्वरणसत्संकल्पश्च कथं प्रकटितः ?

(१९)

शुनःशेपकथा

परिचयः—'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति स्मृतिकारवचनानुसारेण प्रतिवेदं मन्त्रात्मको ब्राह्मणात्मकश्च भागो वर्तते। आरण्यकम् उपनिषदश्चेति भागद्वयमपि ब्राह्मणान्तर्गतमेवेति न पूर्वोक्तस्मृतिवचनविरोधः। मन्त्रात्मक एव वेद इति वदन्तः केचन विद्वांसस्तु स्वोक्तौ किं मूलमवलम्बन्ते इति त एव प्रष्टव्याः। ऐतरेयब्राह्मणं नाम ऋग्वेदीयं ब्राह्मणम्। इतरवेदवदस्यापि जगत्सृष्टिकाल आविर्भूतत्वं वेदशास्त्रपरम्परायां प्रसिद्धम्। ऐतिहासिकास्तु क्रिस्तपूर्वं सार्धद्विसहस्रवर्षादारभ्य सार्धैकसहस्रवर्षपर्यन्तं ब्राह्मणनिर्माणकालमाहुः। कर्मणामुपासनानां ज्ञानस्य वा सार्थवादकं विधानं ब्राह्मणग्रन्थे भवति। तदुपयोगिमन्त्राम्नानं मन्त्रकाण्डे भवतीति औत्सर्गिको नियमः। अपवादस्तु वर्तत एव। इतराया अपत्यं पुमान् इति व्युत्पत्त्या इतरानाम्न्याः कस्याश्चन महर्षिपत्न्याः तनयेन महिदासनाम्ना रचितमेतद् ब्राह्मणमैतरेयब्राह्मणमित्युच्यते। अस्मिंश्च ब्राह्मणे प्राधान्येन ज्योतिष्टोमो राजसूयश्चेति क्रतुद्वयं प्रतिपाद्यते। तत्र राजसूयप्रतिपादकभागान्तर्गतोऽयं (७·१३-१५) परिच्छेदः।

एतस्मिन् परिच्छेदे इक्ष्वाकुकुलोत्पन्नो हरिश्चन्द्रो नाम अपुत्रो राजा पुत्रलाभोपयोगं नारदं पृच्छति। स च तदुपयोगं 'नापुत्रस्य लोकोऽस्ति' इति कथयित्वा वरुणाराधनेन पुत्रप्राप्तिर्भविष्यतीति ब्रवीति। अथ वरुणप्रसादेन जातेऽपि पुत्रे स्वप्रतिज्ञामनुसृत्य पुत्रालम्भनेन वरुणयागमकुर्वन्तं तं वरुणो जलोदररूपेण पीडयामास। पुत्रस्तु रोहितः पलायनेनारण्यं प्राप्य षट्सप्तवर्षपर्यन्तं तत्रैव चरन् पितू रोगवृत्तान्तं श्रुत्वा नगरमागन्तुकामोऽपि इन्द्रेण बहुवारं न्यवार्यत। पश्चाच्च तत्रैवाजीगर्तस्य नाम मुनेः शुनःशेपं नाम मध्यमपुत्र क्रीत्वा यज्ञार्थं पितृसंनिधिमानीतवान् इति कथासन्दर्भः।

वरुणाराधनेन पुत्रलाभो भविष्यतीति प्रतिश्रुतस्य वरुणयागस्याकरणे जलोदरो भविष्यतीति च संकीर्तनेन तत्कालसमाजव्यवस्थायां देवतानुग्रहानुवर्तित्वं प्रधानमासीदिति प्रतीयते। तथा इन्द्ररोहितसंवादेन ऐहिकानां पुरुषाणामामुष्मिकैः पुरुषैः सह दृढतरः सम्बन्ध आसीदित्यपि। तत्र पुत्रविक्रयादयोऽपि तदात्वे प्रसिद्धा बभूवुः। सर्वथा यज्ञसंस्थायाः प्राधान्यं दरीदृश्यते।

हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस। तस्य ह शतं जाया बभूवुस्तासु पुत्रं न लेभे। तस्य पर्वतनारदौ गृह ऊषतुः। स ह नारदं पप्रच्छ।

यं न्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न।
किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद ॥१॥ इति

स एकया पृष्टो दशभिः प्रत्युवाच—

ऋणमस्मिन्संनयति अमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥२॥
यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः ॥३॥

इति हास्मा आख्यायाथैनमुवाच, वरुणं राजानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति। तथेति स वरुणं राजानमुपससार। पुत्रो मे जायताम्, तेन त्वा यजा इति। तथेति। तस्य ह पुत्रो जज्ञे रोहितो नाम। तं होवाच। अजनि वै ते पुत्रो, यजस्व माऽनेनेति। स होवाच। यदा वै पशुर्निर्दशो भवति, अथ स मेध्यो भवति। निर्दशो न्वस्तु, अथ त्वा यजा इति। तथेति। सह निर्दश आस। तं होवाच। निर्दशो न्वभूद्यजस्व माऽनेनेति। स होवाच। यदा वै

पशोर्दन्ता जायन्ते, अथ स मेध्यो भवति । दन्ता न्वस्य जायन्ता-मथ त्वा यजा इति । तथेति । तस्य ह दन्ताः पेदिरे । तं होवाच , अपत्सत वास्य दन्ताः , यजस्व माऽनेनेति । स होवाच । यदा वै पशोर्दन्ताः पुनर्जायन्ते अथ स मेध्यो भवति । दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति । तस्य ह दन्ताः पुनजज्ञिरे । तं होवाच । अज्ञत वा अस्य पुनर्दन्ता यजस्व माऽनेनेति । स होवाच । यदा वै क्षत्रियः सान्नाहुको भवति अथ स मेध्यो भवति । सन्नाहं नु प्राप्नोत्वथ त्वा यजा इति । तथेति । स ह सन्नाहं प्रापत् । तं होवाच । सन्नाहं नु प्राप्नोत् , यजस्व माऽनेनेति ।

स तथेत्युक्त्वा पुत्रमामन्त्रयामास । तात अयं वै मह्यं त्वा-मदात् । हन्त, त्वयाहमिमं यजा इति । स ह नेत्युक्त्वा धनुरा-दायारण्यमुपातस्थौ । स संवत्सरमरण्ये चचार । अथ हैक्ष्वाकं वरुणो जग्राह । तस्य होदरं जज्ञे । तदु ह रोहितः शुश्राव । सोऽ-रण्यात् ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच —

नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम ।

चरैवेति, चरैवेति वै मा ब्राह्मणोऽवोचदिति ह द्वितीयं संवत्सर-मरण्ये चचार । सोऽरण्यात् ग्राममेमाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच ' चरैव ' इति । इति ह तृतीयं संवत्सरमरण्ये चचार । सोऽरण्यात् ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच —

आस्ते भग आसीनस्य ऊर्ध्वस्तिष्ठति तिष्ठतः ।
शेते निपद्यमानस्य चराति चरतो भगः ॥४॥
चरन्वै मधु विन्दति चरन्स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् ॥५॥

चरैवेति ।

एवं चतुर्थं पञ्चमं षष्ठं संवत्सरमरण्ये चचार ।

सोऽजीगर्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय। तस्य ह त्रयः पुत्रा आसुः—शुनःपुच्छः, शुनःशेपः, शुनोलाङ्गूल इति। तं होवाच। ऋषेऽहं ते शतं ददाम्यहमेतेनात्मानं निष्क्रीणा इति। स ज्येष्ठं पुत्रं निगृह्यान उवाच। न न्विममिति। नो एवेममिति कनिष्ठं माता। तौ ह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे। तस्य ह शतं दत्त्वा स तमादाय सोऽरण्यात् ग्राममेयाय। स पितरमेत्योवाच, तत हन्त, अहमनेनात्मानं निष्क्रीणा इति। स वरुणं राजानमुपससार, अनेन त्वा यजा इति। तथेति। भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच। तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच। तमेतमभिषेचनीये पुरुषं पशुमालेभे।

प्रश्नाः —

(१) नारदोक्तं पुत्रलाभप्राशस्त्यं स्ववाक्यैः कथयत।

(२) जातेऽपि पुत्रे वरुणयागस्योपेक्षां हरिश्चन्द्रः कथं कृतवान्?

(३) नगरं गन्तुकामस्यापि रोहितस्य परावर्तने इन्द्रस्य कोऽभिप्रेतोर्थः?

(४) अन्ते च प्रतिश्रुतो वरुणयागः कथं पूर्णतां प्राप?

---

(२०)

पत्रलेखनम्

परिचयः — विविधाभिर्देशभाषाभिः परदेशभाषाभिश्च पत्रलेखन-व्यवहारोऽद्यावधि बहुभिर्लोकैः कृतः करिष्यते च। संस्कृतभाषया पत्रलेखनं तु पुरातनकविकृतेषु कादम्बर्यादिकाव्यग्रन्थेषु क्वचिदेवोपलभ्यते। यथा कादम्बर्यां सार्वभौमतारापीडेन युवराजं चन्द्रापीडं प्रति, यथा च महावीरचरिते परशुरामेण रावणामात्यं माल्यवन्तं प्रतिपत्रं लिखितम्। तथा च ऐतिहासिकाः वदन्ति यत् श्रीशिवछत्रपतिसूनुना श्रीसंभाजीराजेन संस्कृत भाषया श्रीसमर्थरामदासं प्रति पत्रं लिखितम् इत्यादि। अर्वाचीनेषु संस्कृत-पण्डितेष्वप्ययं संस्कृतभाषया पत्रलेखनव्यवहारः सुतरां विरल इति महता खेदेन वक्तव्यं भवति। ईदृश्यां स्थितौ 'संस्कृतभाषा पत्रलेखनादि-व्यवहारेऽनुपयुक्ता, अत एव सा मृतभाषा' इति यदि केचन वदेयुस्तर्हि किं नाम तत्राश्चर्यम्? संस्कृतभाषाया उपासकैः वैदिकशास्त्रिप्रभृतिभिर्जनैरेव यद्येषा भाषा व्यवहारपदात् प्रच्याविता, तर्हि एतया भाषया व्यवहारं केऽन्ये कर्तुं शक्नुयुः?

इदं तावदवधेयं यत् अद्यत्वे इयं भाषा पत्रलेखनादिव्यवहारोपयुक्ता न दृश्यत इत्येतावन्मात्रेण सोऽयं व्यवहारः संस्कृतभाषया न शक्यते कर्तुमिति कथमपि मा मन्यताम्। कृते यत्ने किं नाम न सिध्यति? शास्त्रीया व्यवहारा अनया भाषया सिध्येयुरेव। तथैव लौकिकाः, सामाजिकाः, राजनैतिकाः, धार्मिकाश्चेति सर्वेऽपि व्यवहारा एतया साधयितुं शक्यन्ते इत्येतन्निश्चयेन विनयेन च सहृदयेषु निवेद्यते। एतस्मिन् विषये वाचकानां प्रत्ययोत्पादनाय प्रकृतः पत्रलेखननामकः पाठो विन्यस्तः। अत्रोपयोजितामेव सरणिं प्रतीकविधया मनसि निधाय स्वीयबुद्धिकौशलेनान्येषु व्यावहारिक-विषयेषु संस्कृतभाषानैपुण्यमधिगच्छन्तु प्रियबालविद्यार्थिन इत्यास्तां तावत्।

(सख्युः सखायं प्रति)

श्रीः दिनाङ्कः ११-५-४८

अक्षय्यतृतीया १८७०.

स्वस्ति तत्रभवते आबाल्यं सहाधीतिने सहपांसुक्रीडिताय च प्रियसुहृदे अरविन्दमहाशयाय ।

मित्रवर, बहोः कालादारभ्य पत्रलेखनेन वार्तामपि मह्यमनिवेदयन् भवान् मां परीक्षितुकाम इव लक्ष्यते । एवं स्थितेऽपि कथमहं भवन्तं विस्मरिष्यामि ? यद्यप्यावयोरध्ययनस्थानमन्यत् अध्ययनविषयोऽपि भिन्नस्तथापि अभिन्नमेवान्तःकरणं किल । एवंविधामेव स्निग्धान्तःकरणभावनां दृढीयसीमवलम्ब्य स्वयमेव पत्रलेखने उद्यतोऽस्मि । अत्र गृहजनाः सर्वे कुशलिनः । त्वदीयं च सर्वाङ्गीणं कुशलं मुहुर्मुहुर्निवेद्य मामनुगृह्णीयाः खलु ? अथवा को नामानुग्रहः ? अधिकारेणैवाज्ञापयामि 'लेखनीयमेव मां प्रति त्वया पत्रम्' इति ।

विशेषतु किमु रे मित्र । अन्तरङ्गमाविष्कृत्य किंचित्प्रष्टुकामोऽस्मि । सुदूरं विचार्यातिसरलहृदयेन निर्व्याजवृत्त्या च यद् भवते रोचते तद्यथावस्थितं कथनीयमिति मनसि निधेहि । मम तावदध्ययनं समाप्तकल्पम् । त्रिचतुरैरेव मासैरुत्तीर्णपरीक्षोऽहं पदवीविभूषितो भूत्वा विद्यापीठान्निष्क्रान्तो भविष्यामि । ततः पश्चात् मदीयकर्तव्यविषये किं त्वं मन्यसे ? किं गृहस्थाश्रमो मया स्वीकार्यः ? उत राजकीयसेवावृत्तिलाभाय प्रयतनीयम् ? अथवा स्वतन्त्रोद्योग आरब्धव्यः ? आहोस्वित् सर्वोच्चतमपरीक्षायां श्रेयः सम्पादयितुं प्रयत्नो विधेयः ? इत्येवमादयो विकल्पाः पदे पदे मां व्याकुलयन्ति । जननी तु कथयति--'रूपलक्षणसम्पन्नां कांचन कन्यकां परिणीय मदीये नयने स्नुषादर्शनपारणानन्दमनुभावय' इति । तातचरणानां पक्षान्तरम् – 'विद्या-

भ्यासानुकूले वयसि, दैवदत्ते धनानुकूल्ये, नैसर्गिकमतिवैभवे च विद्यमाने विद्याभ्यास एव तत्परो भूयाः। सर्वोच्चपरीक्षायां लब्धे यशसि सर्वाण्यपि श्रेयांसि तदनुबन्धीनि भविष्यन्त्येव। मम हितैषिणो राजकीयसेवकास्तु 'कुतो वृथा विविधविषयेषु मति खेदनेन श्रमं वहसि ? यं कंचिद्राजकीयाधिकारमवलम्ब्य गौरवं प्रतिष्ठां च लभस्व' इति। उद्योगप्रिया देशभक्तास्तु सम्प्रत्येव समापिताध्ययनं मामौद्योगिकक्षेत्रे प्रवेश्य राष्ट्रोपकारिणं कमपि महदुद्योगं कारयितुमभिलषन्ति। यत्किल वदन्ति 'कन्या वरयते रूपम्' इत्यादि तदेव किञ्चिदन्यथाभूतमिव मद्विषये। एवं स्थिते अपरिपक्वमतेर्मम त्वामन्तरा किमन्यत् प्रश्नस्थानम् ? को वाऽन्यो मार्गदर्शकः ?

अत्रत्यां सर्वां परिस्थितिं यथावन्निवेदितवानस्मि। त्वदीयोत्तरलाभे विस्रब्धः कुतूहली चास्मि। लिखसि चेत्पत्रं द्रागेव लिख। इतोऽपि कान्या प्रार्थना ? भवद्गृहजनेषु आयुष्मद्भ्य आशीर्वादान्, गुरुजनेभ्यः प्रणामांश्च मदीयकुशलेन सह ज्ञापय। विदितमस्तु।

त्वदीयं स्निग्धमित्रम्,
माधवः।

प्रश्नाः —

(१) सांप्रतं संस्कृतभाषया पत्रव्यवहारः कुतो न दृश्यते ?

(२) संस्कृतभाषया पत्रलेखनादयः सर्वे व्यवहाराः साधयितुं शक्या न वा ? कथम् ?

(३) अस्यैव पत्रस्योत्तरं स्वमतमनुसृत्य लिखत।

(४) वार्षिकसंमेलनवृत्तं पत्ररूपेण मातरं प्रति निवेदयत।

---

(२१)

निबन्धलेखनम्

परिचयः — कञ्चन विषयमधिकृत्य स्वकीयविचारप्रदर्शको वाक्य सन्दर्भो निबन्ध इत्युच्यते। तत्र च वस्तुस्वरूपवर्णनात्मको, गुणदोष-विचारात्मको, हेयोपादेयतानिदर्शकश्चेति विविधाः प्रकारा भवन्ति। एव च निबन्धो न केवलं वैदिक शास्त्रीय-सामाजिक-राजनैतिकादिषु विषयेषु रचयितुं शक्यते, किन्तु सर्वजनसाधारणेषु क्षुद्रतमेष्वपि विषयेषु निर्मातुं शक्यः। अधुना च संस्कृतभाषया ईदृशनिबन्धलेखनमनीव विरलं जातम्। सभासंमेलनादिषु प्रसंगेषु क्वचित् क्वचिदेव निबन्धा लिख्यमाना वाच्य-माना श्च दृश्यन्ते, परं ते दुरूहशास्त्रीयविषयेऽतिप्रौढभाषया निबद्धत्वेन पण्डितैकवेद्या भवन्ति। मन्दमतयो बालविद्यार्थिनश्च तादृशनिबन्धानाकर्ण्य संस्कृतभाषासागरनिमग्नमात्मानं विभावयन्तः सम्भ्रान्ता भवन्ति। प्राचीन-निबन्धेषु मतप्रकाशनस्यैव प्राधान्यं दृश्यते स्म। अधुनातनेषु तु निबन्धेषु मतप्रकाशनं विनैव वस्तुवर्णनादेः प्रामुख्यं विलोक्यते। तत्राधुनातनीं पद्धतिमाश्रित्य बालजनव्युत्पत्तये सर्वजनप्रसिद्धचित्रपटविषये निबन्धोऽयं विरचितः। एतन्निबन्धवाचनेन लब्धव्युत्पत्तयो विद्यार्थिनो विषयान्तरेष्वपि निबन्धलेखने पदानि निदधीरन्निति बाढमाशास्यते।

चित्रपटः

नेपथ्यवाद्यगानादीनां विविधानां विषयाणां समवायेन साम्प्र-तिके काले चित्रपटो नाम सुमहत् मनोरञ्जनसाधनम्। एतेषु चित्रपटेषु पौराणिकाः, सामाजिकाः, शिक्षणविषयकाश्चेति नैक-प्रकारता दृश्यते। पुरातने काले चित्रपटेषु केवलं तत्तत्कथावस्तु-सूचकानि चित्राणि दर्श्यन्ते स्म। क्रमेण च विज्ञानशास्त्रप्रभावेण साभिनयचित्रदर्शनमुपक्रान्तम्। तदनन्तरं च तान्येव चित्राणि

भाषितुमप्यारेभिरे। सम्प्रति च तेषां चित्राणां रूपलावण्यसहितानामभिनयकारिणां भाषमाणानां च साक्षात्कारः सामाजिकैः कर्तुमारब्ध इत्यहो चित्रपटकलाया वर्धिष्णुता। उपयोगस्तु विदूरदेशस्थितानां नदीनगरसागरादीनां विविधानां हिंस्रपशूनां, क्षेत्रगिरिकन्दरादीनां, स्थावराणां च साक्षादिव दर्शनं चित्रपटे भवति।

राजनीतिप्रवीणपुरुषैस्तु चित्रपटस्य राजकीयकार्येषु राष्ट्रकार्येषु चोपयोगः कृतः। चित्रपटदर्शनस्य सर्वजनसाधारणतया एष चित्रपटो महत्प्रचारसाधनं संवृत्तम्। इदमेव प्रचारसाधनमवलम्ब्य तत्तद्राष्ट्रप्रमुखा राष्ट्रीयां जनतां स्वकीयविचारैराकृष्टां स्वोक्तमार्गानुवर्तिनीं च कर्तुमभिलषन्ति, द्रागेव च फलं लभन्ते। एतादृशममोघं प्रचारसाधनं यदि साधुविषयप्रचारार्थमुपयुज्यते, सोऽयमुपयोगः सदुपयोग इत्यभिधीयते। यथा शैक्षणिकविषये, औद्योगिकविषये, आरोग्यादिविषये वा चित्रपटं निर्माय तस्य प्रचारः समुचितया पद्धत्या समाजेषु क्रियमाणो महदुपकारी। स एव चित्रपटः केवलशृंगारप्रधानः शृंगाराभासप्रधानो वा यदि निर्मीयते, यदि च अधिकार्यनधिकारिसाधारण्येन सर्वस्मिन्समाजे तस्य प्रचारः करिष्यते तदा सोऽयं तस्य दुरुपयोग एव। अत एव तादृशस्य चित्रपटस्य महाविघातकारित्वमपरिहार्यं भवति। यौवनमुपागतानां स्त्रीपुरुषाणां शृंगारप्रधानचित्रपटदर्शनमनिषिद्धम्। परं तत्रत्येन शृंगारेण अत्युदात्तेन भावगम्भीरेण च भाव्यम्। विद्यार्थिजनानां बालजनानां च शृंगारप्रधानचित्रपटदर्शनेन को नामोपयोगो भवेत्? प्रत्युत वित्तव्ययो निद्राभंग आलस्यप्राप्तिरनारोग्यं विद्याभ्यासवैमुख्यं चेति बहुविधा दोषा एव।

तदेतत्सर्वं मनसि निधाय चित्रपटनिर्माणकारिभी राष्ट्रीयप्रजाजनहितदृष्ट्या तत्तत्कालोचितविद्याभ्यास-शौर्यौदार्यकलाविज्ञानादिविविधगुणसंवर्धकाश्चित्रपटा निर्मातव्याः, न तु

केवलार्थार्जनबुद्धया शृंगारमात्रप्रधानाः। एवं सामाजिकैरपि चित्रपटदर्शनोत्सुकैस्तत्तच्चित्रपटदर्शनात्प्राक् स्वकीयाधिकार-श्चिन्तनीयः। एकमेव साधनं विवेकोपयुक्तं हिताय कल्पते। विना विवेकेनोपयुज्यमानं त्वनर्थावहं भवतीत्यवधेयम्।

———

प्रश्नाः —

(१) निबन्धलेखनाभ्यासेन को लाभः ?

(२) चित्रपटस्य लोकप्रियत्वे को हेतुः ?

(३) अधोलिखितेषु विषयेषु निबन्धा लेख्याः —

(१) युद्धोद्यमः, (२) चित्रकला, (३) व्यायामः।

(४) नाटकचित्रपटयोः कतरत् श्रेष्ठम् ?

———

(२२)

सुभाषितानि

अस्मिन् पाठे प्रसिद्धानां पुरातनानां तेषां तेषां कवीनां ग्रन्थेभ्यः समुद्धृतानां सुभाषितानां संग्रहः कृतः । अत एव नात्र कविकाल-परिचयादीनामावश्यकता । संस्कृतवाङ्मये सुभाषितं नाम विशेषपरिश्रमं विना सुकुमारमतीनामपि व्यवहारज्ञानसम्पादनसाधनम् । एतस्मिन् संकीर्णसंग्रहे कानिचित् सुभाषितानि गुरुदेवतावन्दनपराणि , अपराणि सुजनस्तुतिपराणि , इतराणि दुर्जननिन्दापराणि , अन्यानि च सद्गुण-स्वाभिमानोत्साहविनयसाहसादिपराणि इत्येवं विविधविषयपराणि मनोहारीण्येतानि सुभाषितानि । एतेषां चोपयोगः समाजे स्वकीयं मतं प्रतिपादयितुं , परमतं निराकर्तुं , निबन्धादीन् रचयितुम् , अन्त्याक्षर्यादि पठितुं चेति बहुभिः प्रकारैर्भवेत् । अतः सर्वेऽप्यत्रत्याः श्लोका यथा मुखोद्गता भवेयुः तथा विद्यार्थिनः प्रयतेरन् इति दृढ विश्वसिमः ।

तव करकमलस्थां स्फाटिकीमक्षमालां ,
नखकिरणविभिन्नां दाडिमीबीजबुद्धया ।
प्रतिकलमनुकर्षन् येन कीरो निषिद्धः ,
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥१॥

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो ,
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यपि जैनशासनरताः कर्मेति मीमांसकाः ,
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥२॥

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः कचन समुद्रो न तारङ्गः ॥ ३ ॥
प्रातः प्रातर्जाह्नवीवारि भक्त्या , गाहं गाहं क्लृप्तनित्यक्रियेभ्यः ।
पुष्पैराद्यं पूरुषं पूजयद्भ्यः , पूतात्मभ्यो भूसुरेभ्यो नमोऽस्तु ॥४॥
रजोजुषे जन्मनि सत्त्ववृत्तये , स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे , त्रयीमयाय त्रिगुणात्मने नमः ॥५॥
ध्येयःसदा सवितृमण्डलमध्यवर्ती,नारायणः सरसिजासनसन्निविष्टः
केयूरवान् मकरकुण्डलवान् किरीटी,हारी हिरण्मयवपुर्धृतशङ्खचक्रः६
शिष्यार्पितेन शुचिना द्रविणेन तुष्टाः ,
शिष्टा मुकुन्दशरणागतिधर्मनिष्ठाः ।
सत्सम्प्रदायनियमप्रयताः सदा ये ,
तेभ्यो नमांसि करवै वरवैष्णवेभ्यः ॥ ७ ॥
गिरां देवी वीणागुणरणनहीनादरकरा ,
यदीयानां वाचाममृतमयमाचामति रसम् ।
वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपतेः ,
अधुन्वन् मूर्धानं नृपशुरथवायं पशुपतिः ॥ ८ ॥
सेवा श्ववृत्तिर्यैरुक्ता, न तैः सम्यगुदाहृतम् ।
स्वच्छन्दचारी कुत्र श्वा , विक्रीतासुः क्व सेवकः ॥ ९ ॥
अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् १०
शतमन्युं दण्डधरं कुबेरमपि शूलिनं तथा गदिनम् ।
कुरुते जरा न सा किं कुर्यान्नीरूपनामकं मनुजम् ॥ ११ ॥
अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥ १२ ॥

अहितहितविचारशून्यबुद्धेः ,
श्रुतिसमयैर्बहुभिर्बहिष्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः ,
पुरुषपशोश्च पशोश्च को विशेषः ? ॥ १३ ॥

विधिरेव विशेषगर्हणीयः , करट त्वं रट कस्तवापराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥ १४ ॥

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां ,
जानन्ति ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यते हि मम कोऽपि समानधर्मा ,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ १५ ॥

रूक्षं विरौति परिकुप्यति निर्निमित्तं ,
स्पर्शेन दूषयति वारयति प्रवेशम् ।
लज्जाकरं दशति नैव च तृप्यतीति ,
कौलेयकस्य च खलस्य च को विशेषः ? ॥ १६ ॥

पादाहतोऽथ दृढदण्डविघट्टितो वा ,
यं दंष्ट्रया दशति तं किल हन्ति सर्पः ।
कोऽप्यन्य एव पिशुनोऽद्य भुजंगधर्मा ,
कर्णे परं स्पृशति हन्त्यपरं समूलम् ॥ १७ ॥

कैवर्तकर्कशकरग्रहणच्युतोऽपि ,
जालान्तरे निपतितः शफरो वराकः ।
दैवात्ततो विगलितो गिलितो बकेन ,
वक्त्रे विधौ वद कथं व्यवसायसिद्धिः ? ॥ १८ ॥

अणुरपि मणिः प्राणत्राणक्षमो विषभक्षिणां ,
शिशुरपि रुषा सिंहीसूनुः समाह्वयते गजान् ।
तनुरपि तरुस्कन्धोद्भूतो दहत्यनलो वनं ,
प्रकृतिमहतां जात्यं तेजो न मूर्तिमपेक्षते ॥ १९ ॥

यदि परगुणा न क्षम्यन्ते , यतस्व तदर्जने ,
नहि परयशो निन्दाव्याजैरलं परिमार्जितुम् ।
विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो
दिनकरकरान् पाणिच्छत्रैर्नुदन् श्रमनेष्यसि ॥ २० ॥

अविनयभुवामज्ञानानां शमाय भवन्नपि ,
प्रकृतिकुटिलाद्विद्याभ्यासः खलत्वविवृद्धये ।
फणिभयभृतामस्तूच्छेदक्षमस्तमसामसौ ,
विषधरफणारत्नालोको भयं तु भृशायते ॥ २१ ॥

क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ,
क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितम् ।
क्वचिद्रम्या रामा क्वचिदपि जरार्जरतनुः ,
न जाने संसारः किममृतमयः किं विषमयः ॥ २२ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां ,
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ? ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां ,
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ २३ ॥

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया ,
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालंकाभर्तुर्वदनपरिपाटीषुघटना ,
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥ २४ ॥

प्रकृष्टे सम्पर्के मणिभुजगयोर्जन्मजनिते ,
मणिर्नाहेर्दोषान् भजति न च सर्पो मणिगुणान् ।
असाधुः साधुर्वा भवति ननु जात्यैव पुरुषो ,
न संगाद्दौर्जन्यं न च सुजनता कस्यचिदपि ॥ २५ ॥

नराः संस्कारार्हा जगति किल केचित्सुकृतिनः ,
समानायां जातावपि वयसि सत्यामपि धियि ।

अयं दृष्टान्तोऽत्र स्फुटपरिचयादभ्यसनतः ,
शुकः श्लोकान् वक्तुं प्रभवति न काकः क्वचिदपि ॥ २६ ॥
विधातुर्द्वे कन्ये सुगतिरपरा दुर्गतिरभूत् ,
तयोराद्यां धाता गुणकुलविहीनाय स ददौ ।
ततः पश्चात्तापादिव सुगुणसञ्जातमधुना ,
कुलीनं विद्वांसं वरमिह वरेण्यं मृगयते ॥ २७ ॥
वदन्तु कतिचिद्धठात्खफछठेति वर्णाञ्छठा ,
घटः पट इतीतरे पटु रटन्तु वाक्पाटवात् ।
वयं बकुलमञ्जरीगलदमन्दमाध्वीझरी-
धुरीणपदरीतिभिर्भणितिभिः प्रमोदामहे ॥ २८ ॥
क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः ,
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुत्सुकं तदभवद् दृष्ट्वा स्वमित्रापदम् ,
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ २९ ॥
कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना ,
व्याधोऽधो धृतचापसज्जितशरः श्येनः परिभ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतः ,
तूर्णं तौ तु यमालयं प्रति गतौ, दैवी विचित्रा गतिः ॥ ३० ॥
आहारे वडवानलश्च शयने यः कुम्भकर्णायते ,
संदेशे बधिरः पलायनविधौ सिंहः शृगालो रणे ।
अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः पटुः क्रन्दने ,
भाग्येनैव हि लभ्यते पुनरसौ सर्वोत्तमः सेवकः ॥ ३१ ॥
हस्ती स्थूलतनुः स चांकुशवशः किं हस्तिमात्रोंऽकुशः ,
वज्रेणाभिहताः पतन्ति गिरयः किं शैलमात्रं पविः ।
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तमः ,
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥ ३२ ॥

नास्माकं शिबिका न चास्ति कटकम्रैवेयकालंकृतिः ,
नोत्तुंगस्तुरगो न कश्चिदनुगो नाप्यम्बरं सुन्दरम् ।
किन्तु क्ष्मातलवर्त्यशेषविदुषां साहित्यविद्याजुषां ,
चेतस्तोषकरी शिरोनतिकरी विद्याऽनवद्याऽस्ति नः ॥ ३३ ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः ,
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं ,
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥३४॥

दौर्गत्येन समीरिता हृदयतः कण्ठं समालम्बते ,
कण्ठात्कष्टतरं कथं कथमपि प्राप्नोति जिह्वाञ्चलम् ।
लज्जाकीलककीलितेव निबिडं तस्मान्न निर्यात्यहो ,
वाचा प्राणपरिक्षयेऽपि महतां देहीति नास्तीति च ॥ ३५ ॥

कीर्तिस्ते दयिता तदीयजठरे लोकत्रयं वर्तते ,
तस्मात्त्वं जगतः पिता पितृधनं येनार्थिनां त्वद्धनम् ।
वीर श्रीवर विक्रमार्क भवतस्त्यागं न मन्यामहे ,
कस्त्यागः स्वकुटुम्बपोषणविधावर्थव्ययं कुर्वतः ॥ ३६ ॥

काकुत्स्थस्य दशाननो न कृतवान् दारापहारं यदि ,
क्वाम्भोधिः क्व च सेतुबन्धघटना क्वोत्तीर्य लङ्काजयः ।
पार्थस्यापि पराभवं यदि रिपुर्नाधात् क्व तादृक् तपो
नीयन्ते रिपुभिः समुन्नतिपदं प्रायः परं मानिनः ॥ ३७ ॥

माने नेच्छति वारत्युपशमे क्ष्मामालिखिन्त्यां ह्रियां ,
स्वातन्त्र्ये परिवृत्य तिष्ठति करौ व्याधूय धैर्ये गते ।
तृष्णे त्वामनुबध्नता फलमियत्प्राप्तं जनेनामुना ,
यः स्पृष्टो न पदा स एव चरणौ स्प्रष्टुं न संमन्यते ॥ ३८ ॥

निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।

काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे माद्दशां ,
नो चेद् दुष्कृतमात्मना कृतमिव स्वान्ताद् बहिर्मा कृथाः ॥३९
नैव व्याकरणज्ञमेति पितरं न भ्रातरं तार्किकं ,
दूरात्संकुचितेव गच्छति पुनश्चाण्डालवच्छान्दसात् ।
मीमांसानिपुणं नपुंसकमिति ज्ञात्वा निरस्तादरा ,
काव्यालङ्करणज्ञमेव कविताकान्ता वृणीते स्वयम् ॥ ४० ॥
पायाद्वो जमदग्निवंशतिलको वीरव्रतालंकृतो
रामो नाम मुनीश्वरो नृपवधे भास्वत्कुठारायुधः ।
येनाशेषहताहितांगरुधिरैः सन्तर्पिताः पूर्वजाः ,
भक्त्या चाश्वमखे समुद्रवसना भूर्हन्तकारीकृता ॥ ४१ ॥
नो सन्ध्या समुपास्यते यदि तदा लोकापवादाद्भयं ,
सा चेत्स्वीक्रियते भविष्यति तदा राजन्यबीजे नतिः ।
इत्थं चिन्तयतश्चिरं भृगुपतेर्निःश्वासकोष्णीकृतो
नेत्रान्तःप्रतिबिम्बशोणसलिलः सन्ध्याञ्जलिर्वेपते ॥ ४२ ॥
असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे ,
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सार्वकालं ,
तदपि तव गुणानामीश पारं न याति ॥ ४३ ॥
सदसि विदुरभीष्मद्रोणशारद्वतानां ,
पतिभिरमरकल्पैः पञ्चभिः पालितापि ।
अहह, परिभवस्य द्रौपदी पात्रमासीत् ,
बलवति सति दैवे बन्धुभिः किं विधेयम् ॥ ४४ ॥
प्रत्यासन्नविवाहमङ्गलविधौ देवार्चनव्यग्रया ,
दृष्ट्वाग्रे परिणेतुरेव लिखितां गंगाधरस्याकृतिम् ।
औत्सुक्यस्मितरोषलज्जितधिया गौर्या कथञ्चिच्चिरात् ,
वृद्धस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः सादरम् ॥ ४५ ॥

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे ,
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते ,
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥ ४६ ॥

दैत्येभ्यो न वरानदास्यत यदि त्र्यक्षो मुहुस्तर्हि ते ,
नाशक्ष्यन् भुवनानि पेतुमुदयं नाप्स्यद्दया शार्ङ्गिणः ।
नोदायिष्यत मानुषादिषु हरिर्नो सेतुगीतादिकं ,
प्रारप्स्यद्भगवान्नवार्णवममी नालंघयिष्यन्नराः ॥ ४७ ॥

लीलालुण्ठितशारदापुरधियां विद्वन्मणीनां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वलगन्ति चेत्पामराः ।
अद्य श्वः फणिनां शकुन्तशिशवो दन्तावलानां वृकाः ,
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति सालावृकाः ॥ ४८ ॥

बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि ; प्रह्वता ,
तातेः काननसेवनावधि ; कृपा सुग्रीवसख्यावधि ।
आज्ञा वारिधिबन्धनावधि ; यशो लंकेशनाशावधि ,
श्रीरामस्य बभूव लोकवशता जानक्युपेक्षावधि ॥ ४९ ॥

पेटीचीवरपट्टवस्त्रपटलश्वेतातपत्रच्छटा-
शाटीहारकघोटकस्फुटघटाटोपाय तुभ्यं नमः ।
येनानक्षरकुक्षयोऽपि जगतः कुर्वन्ति सर्वज्ञता-
भ्रान्तिं येन विना तु हास्यपदवीं सन्तोऽपि कष्टं गताः ॥ ५०

कस्त्वं भद्र , खलेश्वरोऽहमिह किं घोरे वने स्थीयते ,
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया ।
कस्मात्कष्टमिदं त्वया व्यवसितं मद्देहमांसाशिनः ,
प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु सर्वान् नरान् ॥ ५१ ॥

झोऽन्तः शश्छोटि शेषो व्यसखि ससजुषोरुर्विरामोऽवसानम् ,
छे चेति व्यर्थवाचः सदसि यदि सतां शाब्दिकाश्चेद् बुधाः स्युः ।

किं तैरेवापराद्धं नटविटगणिकानृत्यहस्तप्रचारैः ,
तोधी तोधी तधीति त्तकिट तकिट धिक् ताहधिक्तत्तकारैः ॥ ५२
भिक्षो कन्था श्लथा ते , नहि शफरिवधे जालिकैषाऽस्ति मत्स्यान् ,
तेऽमी मद्योपदंशाः, पिबसि मधु, समं वेश्यया, यासि वेश्याम् ।
दत्त्वारीणां गलेऽङ्घ्रिं , किमु तव रिपवो , भित्तिभेत्ताऽस्मि येषाम् ,
चोरस्त्वं , द्यूतहेतोः कथमसि कितवो येन दासीसुतोऽस्मि ॥५३॥
वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा ,
पुरारे न क्वापि क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिमान् ,
इतीश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ५४ ॥
विद्वांसो यदि मम दोषमुद्गिरेयुः ,
यद्वा ते गुणगणमेव कीर्तयेयुः ।
युक्तं तत् , बहु मनुते मनो मदीयं ,
कष्टं तत् बत मनुते यदाह मन्दः ॥ ५५ ॥

प्रश्नाः —

(१) वन्दनपरेषु पद्येषु कतमत् पद्यं युष्मभ्यं रोचते ? कुतः?

(२) पुरुषस्य पशोश्च कथमविशेषः ?

(३) ' उत्पत्स्यते हि मम कोऽपि समानधर्मा ' इति वदतः कवेः क आशयः ?

परिशिष्टम् (१) टिप्पण्यः

(१) **कपिराजस्य युक्तिवादः** — द्वन्द्वम् —युद्धम् । निकृत्तः— छिन्नः , नि+कृत् (६ प.) क. भू. धा. वि. । शक्रदत्ता माला—प्रसन्नः इन्द्रः स्वसूनवे वालिने सुवर्णमालां ददाविति श्रूयते । संख्यम्—युद्धम् । करुणवेदी—सांसारिकाणां दुःखशोकादीनामभिज्ञः । समयः—आचारः , समयाः शपथाचार इत्यमरः । विषयः—देशः । अभव्यः—अमङ्गलः । प्रकृतिः— स्वभावः । परिवेत्ता— अकृतविवाहे ज्येष्ठे कृतविवाहः कनिष्ठः , परिवेत्तानुऽजोऽनूढे ज्येष्ठे दारपरिग्रहात् इत्यमरः । वैवस्वतः — यमः , विवस्वान्-सूर्यः , तस्यापत्यम् । अवक्ष्यथाः , आनेष्यम् संकेतार्थे रूपद्वयम् । प्राप्तम् —योग्यम् ।

(२) **काव्यस्य प्रयोजनं स्वरूपं च** — दार्शनिकी — शास्त्रीया । अखिला अर्थाः —वाच्यलक्ष्यव्यङ्ग्यरूपाः । चतुर्वर्गः — त्रिवर्गो धर्म-कामार्थैश्चतुर्वर्गः समोक्षकैः इत्यमरः । फलाननुसन्धानम् —फलानपेक्षणम् , फलापेक्षारहितं कर्म मोक्षाय कल्पते इति सिद्धान्तः । व्युत्पत्त्याधायकत्वम् —पदपदार्थज्ञानोपयोगित्वम् । एकान्तम्— नियमेन । उपचारः—लक्षणा । अन्वयव्यतिरेकानुविधायित्वम् — अन्वयः — सद्भावः , व्यतिरेकः— अभावः , अनुविधायित्वम् —अनुसारित्वम् , कारणसत्त्वे कार्यसत्त्वं नाम अन्वयानुविधानम् , कारणाभावे कार्याभावो नाम व्यतिरेकानुविधानम् । स्वरूपाधायकत्वम्—स्वरूपसम्पादकत्वम् ।

(३) **क्षात्रतेजस्विनी द्रौपदी**— वर्णिलिङ्गी — ब्रह्मचारिचिह्नवान् । बन्धुता— बन्धूनां समूहः । एतर्हि — सम्प्रति , एतर्हि सम्प्रतीत्यमरः । अकुप्यम् —हेमरूप्यात्मकम् ।

(४) कपिराजं प्रति रामस्योत्तरम् — अयुध्यन् — अयमार्षः प्रयोगः , अयुध्यमान इति तु युक्तम् । व्यक्तदर्शनः — लब्धज्ञानः ।

(५) अभियानकालः — अभियानम् — शत्रुमभि गमनम् । जैत्रः —जयशीलः । पश्चात्कोपः — प्रजानामनन्तरभावी कोपः ।.....लाभापदां (विषये) बलाबलमिति सम्बन्धः । गर्भधान्यम् — उप्तं बीजम् । योगोपनिषदौ — योगः — चारपुरुषः , उपनिषद् — निगूढं प्रयुक्तो घातोपायः । ऋतुः — अनुकूलः कालः । मूलम् — प्रमुखं स्थानं राजधान्यादि । पार्ष्णिः — पृष्ठतो देशः । प्रत्यन्तः — सीमाप्रदेशः । भक्तः—धान्यम् । हैमनम्—हेमन्ते उप्तम् । तैषः — पौषः । अनैकान्तिकत्वम् — अनिश्चितत्वम् । अवक्षारः — क्षीणशक्तिः । चतुरङ्गबलम्—हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः ।

(६) निगूढो मन्त्रविचारः — यियक्षमाणः — यागं कर्तुमिच्छन् । पौरुषेयः — पुरुषसमूहः । जित्वरः जयशीलः । अलंभूष्णुः — समर्थः । सात्वतीसूनुः — शिशुपालः । दन्दह्यते— गर्हितं पीडयति । सन्दिग्धे — सम् +दिह् (२ आ.) वर्तमानकाले प्रथमपुरुषैकवचनम् । अनादीनवम्—निर्दोषम् , दोष आदीनवो मतः इत्यमरः । समूलघातमघ्नन्तः — समूलम् अघ्नन्तः । खिलीकृत्य — उत्सन्नम् अकृत्वा । सैंहिकेयः — राहुः सिंहिकासुतः । माजीवन् — कुत्सितं जीवन् । इतरा — अन्या , अगाधता इत्यर्थः । बहुतृणम् — तृणतुल्यः । दवीयान् — दूरतरः । पञ्चतपाः—पञ्चाग्निसाधनं नाम तपो यस्य सः । कथंकारम् — कथम् । चतुर्थोपायः —दण्डः । सामानाधिकरण्यम — एकस्मिन्नाधारे स्थितिः । शेषगवी — शेषः — बलरामः , गावः — वचनानि , शेषस्य गावः शेषगव्य इति विग्रहः । बृहतां पतिः — बृहस्पतिः देवगुरुः ।

(७) चित्रदर्शनम्—विधिः— (चित्रमयी) पंक्तिः । दुर्मनायमाना —खिन्नमानसा । देवयजनम्—यज्ञभूमिः । सरहस्यानि— प्रयोगप्रतिसंहा-

रमन्त्रसहितानि । गोदानमङ्गलम् — माङ्गलिकः क्षौरसंस्कारः । तातपादाः —पितृचरणाः, चरणपादांघ्रिप्रभृतयः शब्दाः पूज्यत्व द्योतयन्ति । आत्मनोऽत्याहितम् — भयावहत्वेऽपि स्वजीवितनिरपेक्षम् । अतिभूमिं गतः — परां कोटिं प्राप्तः । रणरणकम् — नितरां प्रवृद्धश्चिन्ताशोकादिमनोभावः । मन्वन्तरम् — एकसप्ततिर्दिव्ययुगानि , मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः इत्यमरः । निर्व्यूढः — कृतिप्रथेऽवतार्य सिद्धिं गमितः ।

(८) **महाश्वेतादर्शनम्** — आप्याययति — (आ+प्याय् १ आ.) प्रीणयति । मातृमण्डलम्—सप्तमातृसमुदायः , ब्राह्मी माहेश्वरीत्यादिरमरः । पर्याण **प्** — अश्वोपरि उपवेशनार्थमास्तरणम् । खलीनम् — लोहमयमश्वमुखबन्धनम् । स्रस्तरम् — आसनम् ।

(९) **किरातार्जुनौ** — कोलः — वराहः , वराहः सूकरो घृष्टिः कोल इत्यमरः । घोणा — नासिका । ताटङ्कम् — कर्णभूषणम् । निःस्वः— बाणधनशून्यः । अधित्यका — पर्वतोर्ध्वभूमिः । पल्ययनम् — वाहनपृष्ठास्तरणम् । शिलादकुमारः — नन्दिकेश्वरः । उडु — नक्षत्रम् , नक्षत्रमृक्षमित्यादिरमरः । शतरुद्रीयम् — रुद्राध्यायः । अपदानम् — पूर्वकृतं श्लाघ्यकृत्यम् । नदीमातृकः — नदीजलसंवर्धितसस्यपालितो देशः । देशो नद्यम्बु इत्यादिरमरः । प्रतिमल्लः—प्रतिभटः । प्लवङ्गकेतनः — अर्जुनः ।

(१०) **महाभाष्यपरिच्छदौ** — काणादम् — कणादमुनिप्रणीतं वैशेषिकदर्शनम् । पाणिनीयम् — पाणिनिमुनिप्रणीतं व्याकरणशास्त्रम् । आकरग्रन्थाः—संग्रहेण दार्शनिकानामर्थानां प्रतिपादका ग्रन्थाः । ओमिति—वेदारम्भे पठ्यमानः ओंकारः । शमिति—अथर्ववेदारम्भे स्थितस्य ' शं नो देवी ' इत्यादिमन्त्रस्य प्रतीकम् । वृत्तान्तः — प्रपाठकः मन्त्रादीनां समूहः । अनुप्रदानम्–वर्णोच्चारणानुकूलः प्रयत्नविशेषः । शब्दानुशासनम्—व्याकरणम् । कृतम्—अलम् । अनभ्युपायः—असाधकः । प्रतिपत्तिः—ज्ञानम् । दिव्यं वर्षसहस्रम्—मनुष्याणामेकं वर्षं नाम दिव्यो दिवसः , एत-

त्प्रमाणमनुसृत्य दिव्यं वर्षसहस्रं कल्पनीयम्। उत्सर्गः — सामान्यनियमः अपवादः — विशेषनियमः। खारी — परिमाणविशेषः। उपजनम् — नवीनस्य संस्थापनम्।

(११) **शकुन्तला पतिगृहं प्रतिष्ठते** — चूतः — आम्रः, आम्रश्चूतो रसाल इत्यमरः। बाहा — बाहुः। ओदकान्तम् — आ+उदकान्तम्, उदकतीरपर्यन्तम्। क्षीरवृक्षः — क्षीरसहितो वृक्षः वटोदुम्बरादिः। युक्तरूपम् — नितरां युक्तम्, प्रशंसायां रूपप्। दौष्यन्तिः — दुष्यन्तपुत्रः। नीवारः — तृणधान्यम्।

(१२) **मानवकर्तव्यानि** — हारुणिः, ह आरुणिरिति पदच्छेदः, आरुणिरिति कस्यचित् संज्ञा। सुपर्णेयः — सुपर्णासुतः। सुवः —स्वः, स्वर्ग इत्यर्थः। वरूथम् — वरिष्ठम्। स्मारः — संस्कारः।

(१३) **युद्धोद्यतः शिशुपालः**—...वाक् अभीः इति पदच्छेदः। अपष्टु —असत्यम्। नीचि— न्यङ् नाम नीचवृत्तः, सप्तम्येकवचनम्। सरघा — मधुमक्षिका। उपायथाः — उप+यम् (१ आ.) तृतीयभूते द्वितीयपुरुषैकवचनम्। कङ्कतम् — दारुदन्तादिमयः केशप्रसाधनसाधनविशेषः। अघटते — न संगच्छते। मिषताम् — पश्यताम्। वेणुदारिन् — नरकासुरात्मजः। अपमृषितम् — असोढम्। सदवथुः — दवथुः नाम सन्तापः, तेन सहितः।

(१४) **प्रदीप्तकोपं भीमं धर्मराजः सान्त्वयति** — वृकोदरः — भीमः। तीर्थम्—जलावतारः, घट्टः। गुणगृह्यः—गुणग्रहणशीलः। चतस्रो विद्याः — 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। विद्याश्चेताश्चतस्रस्तु लोकसंस्थितिहेतवः' इति कामन्दकः। अस्वन्ततरः—अतिदुरन्तः। रहयति — त्यजति। आयतिः — उत्तरः कालः, उत्कर्षकाल इत्यर्थः। लघयन्—लघूकुर्वन्। हिरण्यरेताः—अग्निः। अनीदृगाशयः—अविद्यमान

ईदृश आशयः यस्य सः । विधेयम् — सन्धिविग्रहादि कार्यम् । विशेष-सम्पदः — भेदविस्ताराः ।

(१५) **यज्ञाधिकारविचारः** — आमनन्ति — वेदे पठन्ति । दर्शपूर्णमासौ — अमावास्यायां पूर्णिमायां च क्रियमाणौ यागौ । ज्योतिष्टोमः — वसन्ते क्रियमाणो यागविशेषः । सत्वम् — प्राणी । अविशेषात् — विधिवाक्ये विशेषनिर्देशाभावात् । चेतयन्ते — अभिलषन्ति । लिङ्गम् — गमकम् । सगुणम् — साङ्गम् ।

(१६) **रघुराजस्य पराक्रमो राजनीतिश्च** – गभस्तिः – किरणः । कटप्रभेदः–गण्डस्थलोद्भेदः । मखः यज्ञः । यज्वा–यागकर्ता, यजमानः । विग्रहः—शरीरम्, शरीरं वर्ष्म विग्रहः इत्यमरः । हरिः — हरितवर्णः । राजन्यः — क्षत्रियः । कपिलानुकारिणा — कपिलेन मुनिना सगराध्वरे अश्वोऽपहृत इति प्रवादः । सर्गः —निश्चयः । प्रकोष्ठः — कूर्पराधोभागः । आलीढविशेषशोभी—आलीढेन आसनविशेषेण विशेषं शोभते इति । व्यपरोपणम् — छेदनम् । नातिप्रमनाः — नातिसन्तुष्टः । सदोगृहम् — यज्ञशालायाः सदोनामको मण्डपविशेषः ।

(१७) **रामस्य वनगमनम्** —संरम्भः—संवृत्तिः, फलमित्यर्थः । उज्जिहाना – अभ्युत्पतन्ती । कौतुकम् – माङ्गलिकं हस्तसूत्रम् । उपयमः— विवाहः, विवाहोपयमौ समौ इत्यमरः, उपयमम्—यमस्य समीपे । श्रवः—कर्णः, श्रुतिः स्त्री श्रवणं श्रवः इत्यमरः । आश्रुतम्—प्रतिज्ञातम् । सत्योद्या — सत्योक्तिः । संस्थास्ये — मरिष्यामि । संनाहः – उद्योगः । पूर्णपात्रम् — सन्तोषनिमित्तं दीयमानं पारितोषिकम् ‘ उत्सवादिषु यद्देयं पूर्णपात्रं तदुच्यते ’ । पांक्तिरथः – दशरथः ।

(१८) **हंसदूतः** —एकपादिका — एकचरणेनावस्थितिः । कमलोदयः — कमला लक्ष्मीः, तस्या उदयः । वरटा—हंसी, हंसस्य योषित् वरटा इत्यमरः । आर्तिः — पीडा । वयः — खगः । तरीः — नौका ।

नीरन्ध्रितम् — अविच्छिन्नम् । शुद्धान्तः — अन्तःपुरम् । विहायाः — विहगः । योग्या — अभ्यासः ' योग्याभ्यासार्कयोषितोः ' इति विश्वः ।

(१९) **शुनःशेपकथा**— सन्नयति —प्रापयति । उपधाव—प्रीणय । एकया—गाथया इति शेषः । मेध्यः—यज्ञार्हः । अपत्सत—उदपद्यन्त । अशत — अजनिषत । सान्नाहुकः — धृतकवचः । श्रेमा — श्रेष्ठत्वम् । सौयवसिः— सुयवसः अपत्यम् । अशनया—(अशनाया) बुभुक्षा ।

(२२) **सुभाषितानि** — अन्त्याक्षरी — एकेन पठितस्य पद्यस्य अन्त्याक्षरं यस्य पद्यस्याद्याक्षरं तदन्येन पठ्यते , सोऽयं पद्यपठनस्पर्धा-विशेषोऽन्त्याक्षरीति व्यवह्रियते । प्रतिकलम् — प्रतिक्षणम् । भूतिः — ऐश्वर्यम् । अर्हन्—जैनदैवतम । प्रमाणम्—ज्ञानसाधनम् । वीणागुणरणने हीनादरः करः यस्याः । शतमन्युः —इन्द्रः कोपनश्च । दण्डधरः — यमः यष्टिधारी च । कुबेरः — उत्तरदिक्पालः कुत्सितशरीरश्च । शूली— शंकरः व्याधितश्च । गदी — विष्णुः रोगी च । नीरूपनामकः — ब्रह्म कुरूपश्च । श्रुतिसमयः — वैदिक आचारः । करटः — काकः , काके तु करटारिष्ट इत्यमरः । कौलेयकः—सारमेयः । कैवर्तः —धीवरः । शफरः— मत्स्यः । विधिः—दैवम् । मणिः-विषहरत्वेन प्रसिद्धो मणिविशेषः । बिसिनी— कमलिनी । जनस्थानम्— लोकवसतिः दण्डकारण्यभागश्च । वैदेहि— वै देहि , हे जानकि इति च । कृतालङ्काभर्तुः—कृता अलं कामर्तुः (कुत्सित-स्वामिनः) कृता लङ्काभर्तुरिति च । वदनपरिपाटीघुघटना —वदन-परिपाटिः (पंक्तिः) तत्र इषु घटना, वदनपरिपाटीषु घटना (नैकमुखेषु दैन्यं प्रदर्शितम्) । कुशलवसुता — कुशल—वसुता (निरपायं धनवत्त्वम्) जानकी च । सुगतिः —सुस्थितिः , दुर्गतिः—दुःस्थितिः । माध्वीझरी— मकरन्दधारा । कृशानौ हुतः—बाष्पीभूत इत्यर्थः । हस्तिमात्रः—हस्ति-प्रमाणः । पविः-वज्रम् । शिबिका-पुरुषवाह्यं यानम् । ग्रैवेयकं—कण्ठभूषा । दौर्गत्यम्—दारिद्र्यम् । मृद्वीका—द्राक्षा । उद्धुरः—समर्थः । इन्तकारः—

यथा देवेभ्यः प्रदाने स्वाहाकारः , यथा च पितृभ्यः प्रदाने स्वधाकार तथा मनुष्येभ्यः प्रदाने हन्तकारः। राजन्यबीजम्—क्षत्रियमूलपुरुषः सूर्यः। कोष्णः—मन्दोष्णः। भृगुपतिः—परशुरामः। देवार्चनम्— विवाहात् पूर्वं वध्वा क्रियमाणं गौरीहरपूजनम् इत्यर्थः। सालावृकः—जम्बूकः सारमेयो वा। प्रह्वता—नम्रता। पेटीचीवरेत्यादि—बाह्योपकरणानि। घटाटोपः—आडम्बरः। अनक्षरकुक्षिः—अक्षरशत्रुः। क्षोन्त इत्यादीनि पाणिनीयसूत्राणि। तोधि तोधीति मृदंगध्वनेरनुकरणम्। उपदंशः—उपखाद्यम्।

परिशिष्टम् (२) आवश्यकं छन्दोविज्ञानम्

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ १ ॥
सममर्धसमं वृत्तं विषमं च तथापरम् ॥
अङ्घ्रयो यस्य चत्वारः तुल्यलक्षणलक्षिताः ।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ २ ॥
प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद् वृत्तं तदर्धसममुच्यते ॥ ३ ॥
यस्य चाङ्घ्रिचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ ४ ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ।
ज्ञेयो लघुर्लकारोऽत्र गकारश्च गुरुर्मतः ॥ ५ ॥
संयुक्तात्र दीर्घं सानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ ६ ॥

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतौ रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥ ७ ॥

यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ १ ॥
आर्यापूर्वार्धसमं द्वितीयमपि भवति सा गीतिः ॥ २ ॥
आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ।
छन्दसि तामुपगीतिं प्रकाशयन्ते महाकवयः ॥ ३ ॥
श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ ४ ॥
पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयात् एतत्पद्यस्य लक्षणम् ॥ ५ ॥
स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ ६ ॥
उपेन्द्रवज्रा जतजास्ततो गौ ॥ ७ ॥
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ ८ ॥
शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥ ९ ॥
रान्नराविह रथोद्धता लगौ ॥ १० ॥
स्वागता रनभगैर्गुरुणा च ॥ ११ ॥
दोधकवृत्तमिदं भभभाद्गौ ॥ १२ ॥
जतौ तु वंशस्थमुदीरितं जरौ ॥ १३ ॥
द्रुतविलम्बितमाह नभौ भरौ ॥ १४ ॥
भुजंगप्रयातं चतुर्भिर्यकारैः ॥ १५ ॥
म्नौ त्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ १६ ॥
सजसा जगौ भवति मञ्जुभाषिणी ॥ १७ ॥
उक्ता वसन्ततिलका तभजा जगौ गः ॥ १८ ॥
ननमयययुतेयं मालिनी भोगिलोकैः ॥ १९ ॥

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ २० ॥
जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ २१ ॥
मन्दाक्रान्ताम्बुधरसनगैर्मो भनौ तौ गयुग्मम् ॥ २२ ॥
नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ॥ २३ ॥
सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ॥ २४ ॥
स्रग्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ २५ ॥
विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी ॥ २६ ॥

(वैतालीयम्)

अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ २७ ॥
प्रथमे सजौ यदि सलौ च तसजगुरुकाण्यनन्तरम् ।
यद्यथ भनजलगाः स्युरथो सजसा जगौ भवतीयमुद्गता ॥ २८ ॥

उपयुक्तानि व्याकरणसूत्राणि

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

१ अइउण् । २. ऋलृक् । ३ एओङ् । ४ ऐऔच् । ५ हयवरट् । ६ लण् । ७ ञमङणनम् । ८ झभञ् । ९ घढधष् । १० जबगडदश् । ११ खफछठथचटतव् । १२ कपय् । १३ शषसर् । १४ हल् इति माहेश्वराणि प्रत्याहारसूत्राणि वर्णसमाम्नायश्च । एषामन्त्यव्यंजनानि इत्संज्ञकानि ।

आदिरन्त्येन सहेता । मुखनासिका वचनोऽनुनासिकः । तुल्यास्यप्रयत्नं सवर्णम् । वृद्धिरादैच् । अदेङ्गुणः ।

इको यणचि । एचोऽयवायावः । आद्गुणः । अकः सवर्णे दीर्घः । वृद्धिरेचि । खरवसानयो र्विसर्जनीयः । ईदूदेद्विवचनं प्रगृह्यम् । यरोनुनासिकेऽनुनासि-

कोवा । विसर्जनीयस्य सः । अतो रोरप्लुतादप्लुते । हशि च । एङः पदान्तादति । भोभगोअघोअपूर्वस्य योऽशि । हलि सर्वेषाम् । ढो ढे लोपः । रो रि । ढ्रलोपे पूर्वस्य दीर्घोऽणः ।

कालाध्वनोरत्यन्तसंयोगे । अधिशीङ्स्थासां कर्म । अभिनिविशश्च । अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि । अन्तरान्तरेण युक्ते । उपान्वध्याङ्वसः । क्रुधद्रुहोरुपसृष्टयोः कर्म । येनाङ्गविकारः । सहयुक्तेऽप्रधाने । रुच्यर्थानां प्रीयमाणः । धारेरुत्तमर्णः । स्पृहेरीप्सितः । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । भीत्रार्थानां भयहेतुः । वारणार्थानामीप्सितः । पराजेरसोढः । पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् । अधीगर्थदयेशां कर्मणि । यतश्च निर्धारणम् । यस्य च भावेन भावलक्षणम् । षष्ठी चानादरे ।

पञ्चम्यास्तसिल् । सप्तम्यास्त्रल् । तदस्यास्त्यस्मिन्निति मतुप् । अस्मायामेधास्रजो विनिः । अत इनिठनौ । तेन तुल्यं क्रिया चेद्वतिः ।

नेर्विशः । विपराभ्यां जेः । समवप्रविभ्यः स्थः । उदोऽनूर्ध्वकर्मणि । समो गम्यृच्छिभ्याम् । स्पर्धयामाङः । भुजोऽनवने । व्याङ्परिभ्यो रमः । उपाच्च ।

षाभ्यां नो णः समानपदे । अट्कुप्वाङ्नुम्व्यवायेऽपि । न पदान्तस्य । इण्कोः । आदेशप्रत्यययोः ।